न्नवदनेक्षणः वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ३७ महाकिरीटकटकः स्फुरन्मकरकुंडलः कां
च्यंगुलीयवलयनूपुरांगदभूषितः ३८

र्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं स तया श्रद्धया युक्तस्याराधनमीहते लभते च ततः कामान् मयैव राम:
विहितान् हितान् ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति वेति ३४ संस्तुवतो दक्षस्य भगवान्प्रत्यक्षोऽभूत् ३५ १७
तं वर्णयति सार्धैस्त्रिभिः सुपर्णस्यांसे स्कंधे कृतौ पादौ येन प्रलंबा अष्टमहांतो भुजाः यस्य चक्राद्यष्टायुधधरः ३६ प्रसन्ने
वदनेक्षणे यस्य वनमालया निवीतं कंठादिपादांतव्याप्तमंगं यस्य लसंतौ श्रीवत्सकौस्तुभौ यस्य ३७ महांति किरीटक
टकानि यस्य स्फुरंती मकरकुंडले यस्य कांच्यादिभिर्विभूषितः वलयमत्र पादभूषणं हस्तकटकस्योक्तत्वात् ३८

त्रैलोक्यमोहनं श्रीपुरुषोत्तमाख्यं सुरयूथपैर्लोकपालैः ३९ ४० ४१ आपूरितानि मनोद्वाराणीन्द्रियाणि यैर्यथा
ह्रदिन्यो निर्झरैरापूर्यंते तथा महानंदापूर्णत्वेनाहत्विकत्वाद्वागादीनां न किंचिदुक्तुं शक्तोऽभूदित्यर्थः यद्यसौ
नावोचत्तथापि चित्तज्ञ इदं वक्ष्यमाणमाह ४२ भावं भक्तिं गतः प्राप्तः ४३ यत्प्रयतस्ते तपः अस्य विश्वस्य उद्बृंहणं वृ

त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः वृतो नारदनंदाद्यैः पार्षदैः सुरयूथपैः ३९ स्तूयमानोऽनुगायद्भिः
सिद्धगंधर्वचारणैः रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ४० ननाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः न किंच
नोदीरयितुमशकत्तीव्रया मुदा ४१ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः तं तथावनतं भक्तं प्रजाका
मं प्रजापतिं ४२ चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ४३ प्रीतोऽहं ते प्रजानाथ यत्तेस्योद्बृंहणं तपः ममैष
कामो भूतानां यद्भूयासुर्विभूतयः ४४ ब्रह्मा भवो भवंतश्च मनवो विबुधेश्वराः विभूतयो मम ह्येता भूता
नां भूतिहेतवः ४५

द्धिकरम तस्ते प्रीतः मत्तपसो लोकसमृद्ध्यर्थत्वेन तत्प्रसीतीतेः किं कारणं तत्राह ममैष इति भूतानां विभूतयः समृद्धयो
भूयासुरिति यत् एष एव मम कामः अतो मत्कामसंपादनादेवाहं प्रीतोऽस्मीत्यर्थः ४४ भूतिविस्तारयत्नश्च तवोचि
त एवेत्याह ब्रह्मेति सर्वेऽतः प्रजापतयः इत्यादि भूतिहेतवः ४५

Indira Gandhi National
Centre for the Arts

भा०ष०स० विश्वसृड्भ्योपि मनःप्रसादं प्रीतः सन् तुष्टः तपस्तु वन् प्रसंगाद्यस्मात् पितो लोकसृष्टिकराणि विद्यादीनि स्तौति तपोयमनियमादि सं
१८ हितं ध्यानं मे हृदयं विद्या सांगमंत्र जपः साध्याननतनोतीति तनुर्देहः क्रियाध्यानादिविषय पुंसा पारोक्ष्यावनाम्ना यद्वा यस्तेन
हितं ध्यानादिकया क्रियात्स्साकृतिः जाता सुनिष्पन्नाः कर्वेगानि शिरो वा एतत्स्यस्व वर्ण्यपीचानृपसदः मद्वृषीञ्यास्पशादि
सादिक्रतेः धर्म्मः हृत्तायमुख्यश्चात्मामनः हृदयाश्रयत्वात् सुरायस्तुजस्त एवक्रमवः प्राणाः संतर्पणीयत्वात् ४६

तपो मे हृदयं ब्रह्मन् तनुर्विद्या क्रियाकृतिः अंगानि क्रतवो जाता धर्म आत्मासवः सुराः ४६ अहमेवास
मेवाग्रे नान्यत्किंचांतरं बहिः संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ४७ मय्यनंतगुणेनंते गुणतो गुण
विग्रहः यदासीत्तत एवाद्यः स्वयंभूः समभूदजः ४८ स वै यदा महादेवो मम वीर्योपबृंहितः मेने खिल
मिवात्मानमुद्यतः सर्गकर्मणि ४९ अथ मेभिहितो देवः तपोतप्यत दारुणं नव विश्वसृजो युष्मान्
येनादावसृजद्विभुः ५० छ्रीः राम:
१८

तपसः संतानहेतुत्वं दर्शयितुं द्वितीयो मत्तामितिहा समाह चतुर्भिः अहमेवेति बस्त्रान्तरस्याकृतिः आसमेवेतिक्रियांतर
व्याकृतिः आंतरं ग्राहकं बहिर्ग्राह्यं संज्ञानमात्रं चैतन्यमात्रं अव्यक्तं इंद्रियवृत्तिविरहितमित्यर्क्तं अतएव प्रसुप्तमिव विश्वतः स
र्वतः सर्वत्र ४७ गुणतो मायातः गुणमयो विग्रहो ब्रह्मांडं ततः तदेव अजयोनिजः खिलमसमर्थमिव ४९ ५० छ्रे

संततिवृद्ध्युपायमाह एषेति अंग हे दक्ष पंचजनस्य नामस्य प्रजापतेः ५१ मिथुनस्य व्यवायो यो रतिः स एवोधर्मो यस्य स
त्वं तथाभूतायां तस्यां ५२ मायया निमित्तभूतया मिथुनीभूय जनिष्यति पुत्रादिरूपेणोत्पत्स्यंते ५४
पंचमेनारदेनाथवाप कूटैस्तु नाशिताः सुतानां कर्णदक्षो मुंशापेति निरूप्यते अपृथक्धर्मशीला एका

एषा पंचजनस्यांग दुहिता वै प्रजापतेः असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां ५१ मिथुनव्यवायधर्मस्त्वं प्रजास
र्गमिमं पुनः मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ५२ त्वत्तोधस्तात्प्रजाः सर्वा मिथुनीभूय मायया म
दीयया भविष्यंति हरिष्यंति च मे बलिं ५३ इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभावनः स्वप्नोपलब्धा
र्थ इव तत्रैवांतर्दधे हरिः ५४ त
तस्यां स पांचजन्यां वै विष्णुमायोपबृंहितः हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः १ अपृथक्धर्मशीलास्ते सर्वे
दाक्षायणा नृप पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशं २ तत्र नारायणसरस्तीर्थं सिंधुसमुद्रयोः संगमो य
त्र सुमहन्मुनिसिद्धनिषेवितं ३ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः धर्मे पारमहंस्ये च प्रोत्पन्नमतयो छ्रे
प्युत ४ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः प्रजाविवृद्धये यत्तान् देवर्षिस्तान्ददर्श ह ५

चारस्वभावाः २ तत्र प्रतीच्यां दिशि सिंधोर्नद्याः समुद्रस्य यत्र संगमस्तत्र स्थनारायणसरो नाम तीर्थं प्रययुरिति त्वयः
सुमहत् अतिविस्तीर्णं ३ विनिर्धूतो मलो रागादिर्यस्मात्स आशयो येषां तान् ४ धु सत्तानपि ४ पित्रादेशात्ताजायेन प्र
जाविवृद्धये यत्तान् उद्युक्तान् ५ छ्रेः

Indira Gandhi National Centre for the Arts

भा०६०अ०५० अहेतोर्मोक्षमार्गाधिकारिणः संति एते च हर्यश्वाः श्रीनारदे तु कर्मनिर्हासेच्छः इति छपयाशान्नित्यवृत्त्यार्थैर्वक्ष्येत्युपक्रमितस्मात्तदाह
२७ उवाचेति चतुर्भिः पालकाः संतोपि बालिशा यस्मात् कथं स्रक्ष्यथ वर्ततिखेदे बालकाइतिपाठे बालिशाश्चेदुत ६
एक एव पुरुषो यस्मिन् तद्राष्ट्रं अदृष्टस्वरूपं विलं वेलादिक्षितीर्यान्तं अविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्व
यः पंचपंचानां पंचविंशतितत्त्वानां गृहं क्षौरपव्यं क्षुरैः पविभिः वज्रैश्चाभिनिर्मितमिवातितीक्ष्णं दृढं चेत्यर्थः स्वयं स्वतंत्रं भ्रमि

उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः अदृष्ट्वान्तं भुवो यूयं बालिशा बत पालकाः ६ तथैकपुरुषं राष्ट्रं बिलं चाद
ृष्टनिर्गमं बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं ७ नदीमुभयतो वाहां पंचपंचाद्भुतं गृहं क्वचिद्धंसं चित्रकथं
क्षौरपव्यं स्वयं भ्रमि ८ कथं स्वपितुरादेशमविद्वांसो विपश्चितः अनुरूपमविज्ञाय अहो सर्गं करिष्यथ
९ तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया १०
भूः क्षेत्रं जीवसंज्ञं यदनादि निजबंधनं अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ११ छे:

रामः
२७

मणस्वभावं ८ विपश्चितः सर्वज्ञस्य स्वपितुरादेशमात्मनोऽनुरूपमविद्वांसोऽजानंतः स्वैः किं चैकपुरुषं राष्ट्रमित्याद्य
विज्ञाय अहो कथं सर्गं करिष्यथेत्यन्वयः वाचः कूटं परोक्षवादो नार्थान्तरमिव प्रतीयमानं वचनं औत्पत्तिक्या स्वाभाविक्या
बुद्ध्या निर्णीतानर्थानाह द्वादशभिः अदृष्ट्वान्तं भुव इत्यस्य राष्ट्रार्थमाह भूरिति क्षेत्रं तच्च जीवसंज्ञं लिङ्गशरीरं यत्तु
तन्निजबंधनमात्मनो बंधकारणं अन्तं राष्ट्रार्थमाह निर्वाणं नाशं असद्भिर्मोक्षानुपयोगिभिः कर्मभिः किं न वेल्लकिमपि
११

एकपुरुषमित्यस्यार्थमाह एक एवेति तुर्यः सर्वसाक्षी स्वाश्रयः स्वाधारः अभवं निवृत्तिमुक्तं असद्भिः ईश्वरासमर्पितैः कर्मभिः १२
बिलं चादृष्टनिर्गमं इत्यस्यार्थमाह पुमानस्य कर्म्याः बिलस्वर्गं पातालं गत इव नैवैति नावर्तते तत्प्रत्यक्धाम ज्योतिःस्वरूपं ब्रह्म अदः अवि
दुषः असद्भिः नश्वरस्वर्गादिसाधनैः कर्मभिः १३ बहुरूपां स्त्रियमित्यस्यार्थमाह नानारूपेति स्वैरिणी पुंश्चलीव विमोहकैः रज
आदिगुणैरन्विता तन्निष्ठां तस्या अवसानं विवेकं अगतस्य अप्राप्तस्य असद्भिरत्रं गते १४ पुमांसं पुंश्चलीपतिमित्यस्यार्थमा
ह तस्याः संगेन भ्रंशितमैश्वर्यं स्वातंत्र्यं यस्य कुत्सिता भार्या यस्य तद्वत् तस्या गतीः सुखदुःखलक्षणाः गच्छंतं संसरंतं जी

एक एवेश्वरस्तुर्यो भगवान्स्वाश्रयः परः तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत् १२ पुमान्नैवैति यद्गत्वा बिलस्वर्गं
गतो यथा प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् १३ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता तन्नि
ष्ठामगतस्येह किमसत्कर्मभिर्भवेत् १४ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत् तद्गतीरबुधस्येह किमस
त्कर्मभिर्भवेत् १५ सृष्ट्यप्ययकरीं मायां वेलाकूलान्तवेगितां मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् १६

वमबुधस्य अजानतः असद्भिः बुद्ध्यविवेकप्राप्तैः १५ नदीमुभयतो वाहामित्यस्यार्थमाह सृष्ट्यप्ययकरीमिति उभयतः प्र
वाहो दर्शितः वेलाकूलं प्रवाहपतितानां निर्गमस्थानं तयोर्विद्यादितस्यां तत्समीपे विभिन्नां निर्गमशक्तिं क्षयकोधाहंका
रादिभिः कृतवेगां मत्तस्य तद्वैतविवशस्य अत एव तां तथाभूतामविज्ञस्य अविचारयः असद्भिर्मायिकैः यथा वेलाकूलं स
मुद्रस्य व्यवहारस्थानं तत्समीपे समुद्रवृद्धिकाले यथा अन्यतो नतवद्भिः कृतवेगा नदी भवति एवं समुद्रत्वस्यात्मनो
व्यवस्थाने देहे जन्ममरणादिभिः कृतवेगा दृश्यमित्यर्थः वेगिनीमिति पाठे वेगवतीं १६ छे:

ना०भा०म० पंचेपंचत्वस्यार्थमाह पंचविंशतितत्वानां पुरुषोंतर्यामी अद्भुतदर्पणं आश्चर्यरूपआश्रयः अध्यात्मकंकार्यकारणसंघा
२० तमुद्दिश्य तारांतमबुधस्य असक्तिः मिथ्यात्वानिश्चयसंकेते: १७ कश्चिद्धंसइत्यस्यार्थमाह ऐश्वर्यंईश्वरप्रतिपादकंकार्यकारणसं
घातपंचस्कंधेनेति हंसपदव्याख्यानांबंधमोक्षावबुद्धयतीतितथा अनेनचित्राः कथायस्येतिव्याख्यानंतदुक्तअध्यात्म
स्यअज्ञानायअविशेषेणसक्तिर्वद्धिर्युरेवे: १८ क्षौरपव्यमित्यस्यार्थमाह कालचक्रमितिअपिः अमणात्मकंतिक्ष्णमितितिक्ष
र्णयदितिचक्षौरपव्यपदमितिव्याख्यातं तदबुधस्य अनतएवफलस्यनित्यत्वबुध्याकाम्यकर्मानुष्ठाने वैगुण्यवाकुत्वाद

पंचविंशतितत्वानां पुरुषोद्भुतदर्पणं अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् १७ ऐश्वरंशास्त्रमुत्सृज्यवंधमो
क्षानुदर्शनं विविक्तपदमज्ञायकिमसत्कर्मभिर्भवेत् १८ कालचक्रंभ्रमिस्तीक्ष्णं सर्वंनिष्कर्षयज्जगत् स्व
तंत्रमबुधस्येह किमसत्कर्मभिर्भवेत् १९ शास्त्रस्यपितुरादेशं योनवेदनिवर्त्तकं कथंतदनुरूपायगुणविस्रं
भ्युपक्रमेत् २० इतिव्यवसितराजन् हर्यश्वाएकचेतसः प्रययुस्तंपरिक्रम्य पंथानमनिवर्त्तनं २१ छे:

सक्तिः १९ स्वपितुरादेशमित्यस्यार्थमाह शास्त्रस्यस्वपितुर्द्वितीयजन्महेतोः तदनुरूपायनिवृत्त्यनुरूपायनिवर्त्तकमादेशं राम:
योनवेदसकथंगुणविस्रंभ्रिगुणमयप्रवृत्तिमार्गविश्वासवानकथमुपक्रमेत् सृष्ट्यादौप्रवर्तितमोदेशवद्धदानांजीवमायात २०
रात्मानंशास्त्रस्यकालोपदेशनात्मज्ञानेकिमुकर्मभिः इतिभावः कूटसंग्रहश्लोकः २० इतिव्यवसिताएवंनिश्चितवंतः एकचेत
सः एकमतयुक्ताः तेनारदपदच्छिदीकृत्य अपुनरावृत्तिमार्गंप्रययुः २१ छे:

निर्णीतः साक्षात्कृतः तोयोहृषीकेशस्तस्यपादांबुजोअनुचरत् अन्वचरदित्यर्थः २२ नानाम्रहशीतं स्वधर्मंत्रंशवाशीले
नशांतेतैशंस्तेरतितथातेषांकदक्षः सुप्रजस्त्वंसत्पुत्रवत्वंश्रुत्वाशोकानांस्थानं २३ अजेनब्रह्मणा सहस्रसंख्यान् २४

स्वरब्रह्मणिनिर्णीतहृषीकेशपदांबुजे अखंडचित्तमाकेपलोकाननुचरन्मुनिः २२ नाशंनिशम्यपुत्राणांनारदाच्छी
लशालिनां अन्वतप्यतकः शोचन्सुप्रजस्त्वंशुचांपदं २३ सभूयःपांचजन्यायामजेनपरिसांत्वितः पुत्रानजनयद्दक्षः
सबलाश्वान्सहस्रशः २४ तउपस्पर्शनादेव विनिर्धूतमलाशयाः जपंतोब्रह्मपरमं तेपुस्तत्रमहत्तपः २५
अब्भक्षाः कतिचिन्मासान् कतिचिद्वायुभोजनाः आराधयन्मंत्रमिममभ्यसंतइडस्पतिं २६ त्रिपि[illegible]सपादि
ष्टाः प्रजासर्गेधृतव्रताः नारायणसरोजग्मुर्यत्रसिद्धाःस्वपूर्वजाः २७ ओंनमोनारायणायपुरुषायमहात्म
ने विशुद्धसत्वधिष्ण्यायमहाहंसायधीमहि २८ इतितानपिराजेंद्र प्रतिसर्गधियोमुनिः उपेत्यनारदःप्राह
वाचः कूटानिपूर्ववत् २९

परमंब्रह्मप्रणवंचदक्षात्मजंत्रेचइडस्पविंचांपत्रंणांपतिंविष्णुमाराधयामासुः २७ विशुद्धसत्वाश्रयायपरमहंसायन
मोमहाति २८ प्रतिसर्गेधीर्येषांतावचाचः कूटानिमदृष्टांतनुवदस्यादीनिपूर्ववेक्षितानिप्राह २९ श्री: छे:

भा०६०स० देशाख्यायणाः संश्रुत्य ते तस्मात् पुनरन्यद् अपि द्वारं निगमं उपदेशं अन्विच्छत अवलोकयत ३० शावल्यं प्रकृष्टं गमनं पुत्रप्रेमवैधुर्यं
२१ स्नापसङ्गिस्त्रीत् वत्सलैः देवैः ३१ अमोघदर्शनं यस्य स्मारिष आर्य्याः ३२ सध्रीचीनं प्रतीचीनं प्रत्यक्प्रवृत्ति तेषां अनुपथं अनुगु
णं पंथानं पश्चिमा यामिनीः गताः रात्रय इव ३३ पुत्राणां पारमेष्ठ्यं सन्निधापुपश्रुत्य सदक्षोपि शोचक्रोधविरक्तः स्यादिति तदनुग्रहार्थं
देवर्षि तत्पार्श्वगतस्तदामुपलभ्य दक्षः आह साधोः खिलिङ्गवेषो यस्य तेन त्वया नोऽस्मदीयानां अर्भकाणां असाधु अकारि कृतं
तदेवाह साधूनां साधुमेव प्रस्तानां भिक्षोर्यो मार्गः प्रदर्शितः ३४ ननु संन्यासिनो मार्गः साधुरेवेति अस्ति तत्त्वात्सत्यं ऋणत्रयापाकर

दारुण्यणाः संश्रुत्य तद् अतो निगमं मम अन्विच्छतानुपदवीं आचरणं आचरत्सलाः ३० सौहृदं शावल्यं आत्तयो उतिष्ठेविध
मैविन् सपुत्र्यां बंधुः पुरुषो मरुद्भिः सह मोदते ३१ एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः तेपि चात्मगमन्मार्गं आचरणमेव
मारिष ३२ सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीर्यथा ३३ एतस्मिन्काल उत्पातान्
बहून् पश्यन्प्रजापतिः पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ३४ चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः देवर्षिमुप
लभ्याह रोषाद्विस्फुरिताधरः ३५ अहो असाधो साधूनां साधुलिङ्गेन नस्त्वया असाध्वकार्यर्भकाणां
भिक्षोर्मार्गः प्रदर्शितः ३६ ऋणैस्त्रिभिरमुक्तानां अमीमांसितकर्मणां विघातः श्रेयसः पापलोकयोरुभयोः कृतः ३७

णं विना तु महाननर्थ एवेत्याह ऋणैरिति जायमानो वै ब्राह्मणस्त्रिभिरृणैवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृ राम:
भ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासीति श्रुतः ऋणैरमुक्तानां अमीमांसितानि विचारितानि विषमतानि कर्माणि येषां ते २२
षां तावदृणम् इमे विमोको नास्ति तत्कालकालं नाविल्ला तत्पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिऋणः १ तन्निवृत्ति
श्चनास्ति अतः इह पापविषयभोगाभावात् इहलोके श्रेयसो विघातः कृतः मोक्षानधिकारित्वात् परलोकेपि श्रेयसोपि
विघातः कृत इत्यर्थः तथा च मनुः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ३७

बालानां मतिं पुत्रादिविषयां भिन्दन्नितिनत्वा एवं त्वं निरनुक्रोशः निर्घृणः हरेर्यशोनाशकः सन् तस्य बन्दी जनो भवेत्कथं चरसि ३८
निर्लज्जत्वमेवाह ननु भागवताः सर्वे भूतानुग्रहपरवशाः त्वं तु भूतविप्रियं कुर्वन्कथं न लज्जसे इति भावः ३९ ननु वैराग्यादुपश
मो भवति संतति विच्छेदो न भवति न च विरक्तस्य ऋणत्रयापाकरणाभावे पकं यदहरेव विरजेत्तदहरेव प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादे
व प्रव्रजेत् गृहाद्वा वनाद्वा इति श्रुतेः अतो वैराग्योपदेशेन तेषामयानुग्रह एव कृत इति चेत्तत्राह नेति यद्यपि त्वमेवं मन्यसे तथापि मृषा केवलेना

एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः पार्षदमध्ये चरसि यशोहा निरपत्रपः ३८ ननु भागवतानित्यं भूतानुग्रहकात
राः ऋते त्वां सौहृदघ्नं वै वैरङ्करमवैरिणाम् ३९ नेत्थं पुंसां विरागः स्यात् त्वया केवलिना मृषा मन्यसे यद्युपशमं स्नेह
पाशनिकृन्तनं ४० नानुभूय न जानाति पुमान् विषयतीक्ष्णतां निर्विद्यते स्वयं तस्मान्न तथा भिन्नधीः परैः ४१ यन्नः
स्वकर्मसंधानां साधूनां गृहमेधिनां कृतवानसि दुर्मर्षं विप्रियं तव मर्षितं ४२ ॥ श्री ॥ ॥ छ ॥

ज्ञानं विधूनां क्षत तवैवेयं त्वया इत्थं मति चालनेन कृतेपि पुंसां विरागो नैव स्यात् न च विरागं विनोपशमः न च तेन विना स्नेहपाशनिकृ
न्तनमित्यर्थः ४० इत्थं विरागो न स्यादित्यत्र हेतुमाह नानुभूय विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जानाति तस्माद्विषयानुभवेन ती
क्ष्णत्वज्ञानात् अतस्त्वया अस्माकं अप्रियमेव कृतं ४१ तथापि वयं न क्रुध्यामहे इत्याह यदिति कर्मसंधानां कर्ममर्यादानां कर्तुं संधा
नां प्रतिपाठे विप्रियं कर्तुं भजानतामित्यर्थः ९ सह्यं कृतवानसि तत् अस्माभिः मर्षितं सोढं ४२ ॥ श्री ॥ ॥ छ ॥

Indira Gandhi National
Centre for the Arts

भा०ष०स० तथापि विवदन्नेवं अविष्पत्य चेत्यादि तेषु सत्सु संतानच्छेदकश्च यस्मात् अस्मत्पुत्राणां त्वया त्वं मत्पुरः अचरः तत्तस्माल्लोके भ्र
तः पदं स्थानं न स्यादिति मूढछलेन संन्यासः ४७ वाढं तथेति स्वीकृतवान् ईश्वरोऽपि शक्तिमान् मम योऽपि तितिक्षितेत्यसहते तिपतत्ता
२२ कीनवा ४८ षष्टिं दक्षिणस्त्र्यां कस्मां षष्ट्यां प्रकीर्तितं पृथक् अत्रयतो जातो विश्वस्तोदितिः सुतान् १ नारदा
सुखेन नाशमात्रोकमानो दुहितृर्जनयामास १ कायकस्यापद्विषट् द्विगुणाः षट् द्वादश्यां सुतास्त्रयोदशोऽसमर्थः इंदोः सोमा

तंतुकृंतनयत्नस्त्वमत्यमचरः पुनः तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदं ४७ प्रतिजग्राह तद्वाढं
नारदः साधुसंमतः एतावान् साधुवादो हि तितिक्षेतेश्वरः स्वयं ४८

ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा षष्टिं संजनयामास दुहितॄः पितृवत्सलाः १ दश
धर्माय कायेंदो द्विषट् त्रिनव दत्तवान् भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः २ नामधेयान्यमूषां त्वं
सापत्यानां च मे शृणु यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ३ भानुर्लम्बा ककुद्यामिर्विश्वा साध्या म
रुत्वती वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुतान् शृणु ४ भानोस्तु देवऋषभ इंद्रसेनस्ततो नृप विद्योत आ
सील्लम्बायास्ततश्च स्तनयित्नवः ५ ककुदः संकटस्तस्य कीकटस्तनयो यतः भुवो दुर्गाणि जामेयः स्वर्गो राम:
नंदिस्ततोऽभवत् ६ २२

यत्र नवसप्तविंशतिर्तार्क्ष्यनाम्नोऽन्तरं प्रागायकस्य पायेकश्चापराः अवशिष्टाश्चेतसः २ सापत्यानां अपत्यसहितानां मे मत्तः
शृणु प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ३ ततो देवऋषभ्नात् ४ यतः कीकटाद् भुवो दुर्गाभिमानी देवाः जामेयः जम्याः पुत्रः स्वर्गः ६

ततस्तुतः साध्यानां तत्सुतः ७ ८ वसोर्वसुत्वमन्वयस्मात् अंते निर्देशः मे मत्तः १० आंगिरसस्तिर्नाम पत्नी तस्याः सर्वाः सुताः
११ सदृश्चआयुस्व पुरोजवश्च पुत्राः पुरः पुराणि १२ १३ स्कंधश्च कृत्तिकासुतोऽग्नेः पुत्रः षण्मातुरश्शरीरे अग्नेर्नैरविचव

विश्वेदेवास्तु विश्वायाः अप्रजांस्तान् प्रचक्षते साध्योगणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ७ मरुत्वांश्च जयंत
श्च मरुत्वतो बभूवतुः जयंतो वासुदेवांश उपेंद्र इति यं विदुः मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ये वै फ
लं प्रयच्छंति भूतानां स्वस्वकालजं ९ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः वसवोऽष्टौ वसोः पुत्रास्तेषां ना
मानि मे शृणु १० द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ११ प्रा
णस्योर्जस्वती भार्या सह आयुः पुरोजवः ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः १२ अर्कस्य वासना भार्या
पुत्रास्तर्षादयः स्मृताः अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः १३ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः
दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला १४ वसोरांगिरसीपुत्रो विश्वकर्माकृतीपतिः ततो मनुश्चाक्षुषोऽभू
द्विश्वे साध्या मनोः सुताः १५ विभावसोरसूतोषा व्युष्टं रोचिषमातपं पंचयामोऽथ भूतानि येन जाग्रति कर्मसु १६

स्कंदः स्वतत्स्कंदात् १४ आकृतिपतिः शिल्पाचार्यः ततो विश्वकर्मणः चाक्षुषो रासीत् १५ उषाभार्या व्युष्ट आतपात् पं
चयामो दिवसो जातः अत एव त्रियामा रात्रिः प्रदोषप्रत्यूषयोर्दिवसप्रावयवत्वात् १६ श्री छे छे

Indira Gandhi National
Centre for the Arts

भूतस्य द्वे भार्ये तयोर्वंशमाह सरूपेति १७ महानिति कादंबरूपस्य रुद्रस्य पार्षदा श्वेतादयः अन्ये अन्यस्यां
ग्रा०१०स० जाताः १८ अंगिरसः स्वधासतीचेति द्वे भार्ये तयोर्वंशमाह प्रजापतेरिति स्वधा नाम पत्नी पितॄन् पुत्रत्वेकरोत्
२३ अथ सती च अथर्वांगिरसं नाम वेदं १९ कृशाश्वस्य अर्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह कृशाश्वइति २०
२१ सुपर्णा विनता अरुणं २२ रोहिण्या मेव चेमा तिस्रा येनामा सा पुपे दक्षणात् कुपितेस्पंद दक्षस्य सापात् य

सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः रैवतोऽजो भवो भीमो वामउग्रो वृषाकपिः १७ अजैकपादहिर्बुध्नो ब
हुरूपो महानिति रुद्रस्य पार्षदाश्चान्ये घोरा भूत विनायकाः १८ प्रजापतेरंगीरसः स्वधापत्नी पितॄनथ
अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती १९ कृशाश्वोर्चिषि भार्यायां धूम्रकेशमजीजनत् धिषणायां वेद
शिरो देवलं वयुनं मनुं २० तार्क्ष्यस्य विनता कद्रू पतंगी यामिनीइति पतंगसूत पतगान् यामिनी शलभा
नथ २१ सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनं सूर्यसूतमनूरुंच कद्रूर्नागाननेकशः २२ कृत्तिकादीनि
नक्षत्राणीं दोः पत्न्यस्तु भारत दक्षसापासोनपत्य स्तासु यक्ष्मग्रहार्दितः पुनःप्रसाद्य तं सोमः कलालेभे
क्षये दीताः २३ शृणु नामानि लोकानां मातॄणां शंकराणिच अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् २४ राम:
अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः २५ छै २३

क्षयग्रहार्दितः क्षयरोगपीडितः सन् नास्वनपत्योऽभूत् तास्वनपत्योऽभूत् तं दक्षं प्रसाद्य केवलं कला एव लेभे न तु प्रजा
नि कथंभूताः क्षये कृष्णपक्षे दिताः खंडीताः सनीपागतेस्य येसति पुनरेधीतास्तेनेव वर्द्धिताः सती २३ २४ २५ छै

अन्त्येनक्रमुग्रमत्वात् यथाक्रमं मुक्रमेण तासां वंशानाह तिमेरित्यादि २६ २७ सौरसाः सुरसायाः पुत्राः २८ प्राधानिका
न पुरुषानदृष्टादृष्ट्वा शृणु २९ ३० ३१ वैश्वानरो दनोः पुत्रस्तस्य सुताः ३२ ३३ कः प्रजापतिः कश्यप उपयेमे दानवी परिणयनेर्दे

तिमेर्यादोगणा आसन् श्वापदाः सुरमासुताः सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप २६ ताम्रायाः श्येनगृध्रा
द्याः मुनेरप्सरसां गणाः दंदशूकादयः सर्पा राजन् क्रोधवशात्मजाः २७ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः
अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः २८ सुता दनोरेकषष्टि स्तेषां प्राधानिकान् शृणु द्विमूर्धा शंबरोरिष्टो हयग्री
वो विभावसुः २९ अयोमुखः शंकुशिराः स्वर्भानुः कपिलोऽरुणः पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ३० धूम्रकेशो वि
रूपाक्षो विप्रचित्तिश्च दुर्जयः स्वर्भानोः सुप्रभां कन्यां मुवाह नमुचिः किल ३१ वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो ब
ली वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ३२ उपदानवी हयशिराः पुलोमा कालिका तथा उपदानवीं हिरण्याक्षः
क्रतुर्हयशिरां नृपः ३३ पुलोमां कालकां च द्वे वैश्वानरसुते प्रते उपयेमे थ भगवान् कश्यपो ब्रह्मचोदितः ३४ पौलोमाः
कालकेयाश्च दानवा युद्धशालिनः तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता ३५ जघान स्वर्गतो राजन् एक इंद्र
प्रियंकरः विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ३६ राहुज्येष्ठं केतुशतं ग्रहत्वं यउपागतः अथातः श्रूय
तां वंशो योदितेरनुपूर्वशः ३७ यत्र नारायणो देवः स्वांशेनावतरद्विभुः विवस्वानर्यमा पूषा त्वष्टाथ सविता भ
गः ३८ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुं ४० श्री छै

उः ब्रह्मणा चोदितः ३४ तयोः षष्टिसहस्राणि निकपिलोऽरुणः पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः धूम्रकेशो विरूपाक्षो
विप्रचित्तिश्च दुर्जयः नकवचाः पुत्राः जाताः ३५ तांस्त्वं स्वर्गगतः सन्नतोपि तामहो जंभो जघान ३६ राहुर्ज्येष्ठो यस्य ३६
अल्पतमजयत् ३७ मुदितेर्वंशा [illegible] छै

Indira Gandhi National
Centre for the Arts

भा०१०स० ततः विवस्वतः ४१ चर्षणाख्यः कृताकृतस्तावर्वतः यत्रपतिकर्मत्वेन निषंगावुक्ते: यत्रयेषुश्चात्मानुसंधान
२४ विशेषणमानुषीजातिश्चोपकल्पिता तथाचश्रुतिः पुरुषेत्वेवाविस्तरामात्मेति ४२ कुपितस्त्वमितित्रोषः
विहितदंतः सन् ४३ ४४ यद्यदामैविमतेनबृहस्पतिनापरित्यक्ताः तदाद्विषतांराज्ञुणांऽगिरोयपिविश्वरू

मिथुनंचमहात्मनाम यमंदेवंयमीतथा सोवभूत्वाऽथवडवानासत्यौसुषुवेभुवि ४० छायाशनैश्चरंलेभे सावर्णिंचमनुंतम: कन्यांचतपतींयावैवव्रेसंवरणंपतिं ४१ अर्यम्णोमातृकायापत्नीतयोश्चर्षणाय: सुताः यत्रवैमानुषीजातिर्ब्रह्मणाचोपकल्पिता ४२ पूषाऽनपत्यःपिष्टादोभग्नदंतोऽभवत्पुरा योसौदक्षायकुपितं जहासविवृतद्विजः ४३ त्वष्टुर्दैत्यात्मजाभार्या रोचनानामकन्यका: सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ४४ तंवव्रिरेसुरगणाः स्वस्त्रीयंद्विषतामपि विमतेनपरित्यक्ता गुरुणांगिरसेनयोत् ४५
यस्यहेतोःपरित्यक्ता आचार्येणात्मनःसु
राः एतदाचक्ष्वभगवान् शिष्याणामक्रमंगुरो १ श्री
छैः

टीका:
२४
पंचयोरोहित्येवृतवंतः ४५
समप्रेविश्वरूपोसोयोरोहित्येवृतःसु
रैःगुरुणासंपरित्यक्तैः पौरोहित्यमथाकरोत् २ यस्यहेतोःकस्माद्धेतोः आत्मनःशिष्याःसुराःपरित्यक्ताःअक्रमम
छै
पराधं २

सइंद्रोपदासंप्राप्तंवाचस्पतिंनाभ्यनंदतनादृतवान् तदासअंगिरसःततोनिर्गत्यतूष्णींस्वगृहमाययावित्यष्टानामन्वयःआना
दरेहेतुमदद्वयोर्थितुतेविनानष्टित्रिभुवनैश्वर्यमदेनोल्लंघितःसतांपंथायेनसः २ परिश्रितःपरिवृतः ३४ आस्थानेसभायांसि
न् अध्यासनेसिंहासनेतदास्थितः ५ पारमेष्ठ्यैर्महाराजचिन्हैः आसनस्यार्धोस्थितयापौलोम्यासहविराजमानः सन् ६ ७

इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः आदित्यैर्वसुभीरुद्रैर्मरुद्भिर्ऋभुभिर्नृप
२ विश्वेदेवैश्चसाध्यैश्चनासत्याभ्यांपरिश्रितः सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ३ विद्याधराप्सरोभि
श्च किंनरैःपतगोरगैः निषेव्यमाणोमघवान् स्तूयमानश्चभारतः ४ उपगीयमानोललितमास्थानाध्यासनाश्रि
तः पांडुरेणातपत्रेण चंद्रमंडलचारुणा ५ युक्तश्चान्यैःपारमेष्ठ्यैश्चामरव्यजनादिभिः विराजमानःपौलोम्या
सहार्धासनयाभृशं ६ सयदापरमाचार्यं देवानामात्मनश्चह नाभ्यनंदतसंप्राप्तं प्रत्युत्थानासनादिभिः
७ वाचस्पतिंमुनिवरंसुरासुरनमस्कृतं नोच्चचालासनादिंद्रः पश्यन्नपिसभागतं ८ ततोनिर्गत्यसहसा
कविरांगिरसःप्रभुः आययौस्वगृहंतूष्णीं विद्वान्श्रीमदविक्रियां ९ तर्ह्येवप्रतिबुध्येंद्रो गुरुहेलनमात्म
नः गर्हयामाससदसि स्वयमात्मानमात्मा १० अहोवतमयाऽसाधु कृतंवैदभ्रबुद्धिना यन्मयैश्वर्यमत्तेन
गुरुःसदसिकात्कृतः ११

स्थानादिनानाभ्यनंदत ७ नोच्चचालऽपासनएवस्थितोकिंचिच्चलितवान् ८ श्रीमदेनयाविक्रियातांविद्वान्
जानन् ९ प्रतिबुध्यअनुस्मृत्य १० मत्कृतंकर्मअहोअसाधु यद्यस्मादभ्रबुद्धिनाऽल्पमतिनामयाकात्कृतः तिरस्कृतः
११

Indira Gandhi National
Centre for the Arts

भा०६०स्क० विबुधानां सात्विकानां देवानामीश्वरोऽप्यहं १२ ननु सिंहासनस्थो राजा नमस्यानं न कुर्यादिति ह्यावदंति तत्राह य इति पारमेष्ठ्यं धिषण
२५ मासनं १३ कुपथं दिशंतीति कुपथदेष्टारस्तेषां वचः अश्ममयः प्लवो येषां ते यथा मज्जंति तद्वत् १४ अगाधा गंभी

तथाकारष्टधेत्संज्ञितोलक्ष्मी त्रिविष्टपपतेरपि यया ह्मासुरं भावं नीतोऽद्य विबुधेश्वरः १२ यः पारमेष्ठ्यं धिषणमधितिष्ठ
न्न कंचन प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः १२ तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ये श्रद्दध्युर्वचस्ते वै म
ज्जंत्यश्मप्लवा इव १३ अथाहममराचार्यमगाधधिषणं द्विजं प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् १४ एवं चिं
तयतस्तस्य मघोनो भगवान् गृहात् बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया १५ गुरोर्नाधिगतः संज्ञां परीक्षन् भ
गवान् स्वराट् ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः १६ तच्छ्रुत्वैवासुराः सर्वे आश्रित्यौशनसं मतं देवा
न्प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः १७ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ब्रह्माणं शरणं जग्मुः सहें
द्रा नतकंधराः १८ तांस्तथाभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः कृपया परया देव उवाच परिसांत्वयन् १९ अहो
बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत् ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनंदत २० राम:
२५

राधिषणा यस्य तं निशठः शाठ्यहीनः सन् १५ अधिकयात्ममायया १६ गुरोः संज्ञां ज्ञानोपायं परं ह्यप्राणो पि नाधिगतः अप्राप्तः
१७ आततायिनः उद्यतास्त्राः १८ निर्भिन्नान्यंगानि ऊरवो बाहवश्च येषां १९ २० वो युष्माकं कृतं
करणं महदभद्रं तदाह ब्रह्मिष्ठमिति नाभिनंदितः २१

परोभ्यः शत्रुभ्यो वः पराभव इति यत् अयं तस्य अनयस्य अन्यायस्य संबंधि फलरूप आसीत् उक्तं च ब्राह्मणं कुलसंपर्कं नत्वं विष्णोर्महात्म
नः आयांतं वीक्ष्य नोत्तिष्ठेत्स दैवैः परिभूयत इति स्वयमेव वैरिणो हंतारो येषां तेभ्यः २२ गुरुतिरस्कारो येषां पापवर्य कारणमित्युक्तं दृष्टांतेना
ह मघवन्निति द्विषतः शत्रून् काव्यमाराध्य गुरुमेवासेव्योपचिताः उपचितत्वमेवाह आददीरन्नित्यादि भृगुः २३ अभेद्यो मंत्रो येषां अनु
शिक्षितार्थाः पतः विप्रगोविंदो गावश्चेश्वराः अनुग्राह्यकायेषां तेषामेव अभद्राणि न भवंति अन्येषां तु भवंति २४ तत्तस्मात् अथ अनंतर

तस्यायमनयस्यासीत्परेभ्यो वः पराभवः प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः २२ मघवन्द्विषतः पश्य
प्रक्षीणान्गुर्वतिक्रमात् संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः आददीरन्निलयनं ममापि भृगुदेव
ताः २३ त्रिविष्टपं किं गणयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि न
रेश्वराणां २४ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतं सभाजितोऽर्थान् स विधास्यते वो यदि क्ष
मिष्यध्वमुतास्य कर्म २५ त एवमुदिता राजन् ब्रह्मणा विगतज्वराः ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येऽ
दमब्रुवन् २६ वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते कामः संपाद्यतां तात पितॄणां समयोचितः २७
पुत्राणां हि परो धर्मः पितृशुश्रूषणं सतां अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणां २८ आचार्यो ब्रह्मणो मूर्तिः
पिता मूर्तिः प्रजापतेः भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः २९ दयाया भगिनी मूर्तिर्धर्मस्यात्माति
थिः स्वयं अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ३०

मेव भजत अस्य कर्म असुरपक्षपातं २५ उदिता उक्ताः २६ अतीथीनां पितॄणां च पुत्रांस्मार्थमाकुः आचार्य उपवियवेदाध्यापकः
ब्रह्मणो वेदस्य मूर्तिः २९ धर्मस्यात्मा मूर्तिरतिथिः स्वयं साक्षात् आत्मनेऽग्नी विष्णोः यद्वा आत्मनः स्वस्य सर्वभूतेष्वात्मदृष्टिः कर्तव्ये
त्यर्थः ३०

Indira Gandhi National
Centre for the Arts

भा०ष०१० पस्य: परिभवए वार्तिः तां ३१ संदेशमाज्ञां वृणीमह इति ३२ ननूपाध्यायत्वे कनिष्ठस्य ममाभिवादनं करिष्यथ तच्च गर्हितं तत्राह न
हि अर्थेषु प्रयोजननिमित्तं यविष्ठानामभिवादनं निंदंति किंच तद्दोषः मंत्रेभ्योऽन्यत्र वयो ज्यैष्ठस्य कारणं ज्येष्ठस्य कारणं न तु मंत्रेषु
अतोऽस्मासु मंत्रदातृत्वेन त्वमेव ज्येष्ठो भविष्यसि यद्वा छंदोभ्योऽन्यत्र वेदान् विहाय वयोज्येष्ठस्य कारणं भवति किंतु वेदा एव कारणं
तस्मात्तु वयः वेदज्ञत्वात्त्वमेव ज्येष्ठ इत्यर्थः ३३ ३४ निंदितमपि दृष्ट्वा भवाद्भिर्याच्यमानं करिष्यामीत्याह सार्द्धेन विगर्हितं पौ

तस्मात्पितॄणामार्त्तानामार्त्तिं परपराभवं तपसापनयंस्तात संदेशं कर्तुमर्हसि ३१ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं
गुरुं यथांजसा विजेष्यामः सपत्नांस्तव तेजसा ३२ न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्यभिवादनं छंदोभ्योऽन्यत्र न ब्रह्मन् वयो
ज्येष्ठस्य कारणं ३३ अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गि
रा ३४ विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययं कथं नु मद्विधो नाथा लोकेशैरभियाचितं प्रत्याख्या
स्यति तच्छिष्यः स एव स्वार्थ उच्यते ३५ अकिंचनानां हि धनं शिलोंछनं तेनेह निर्वर्तितसाधुसत्क्रियः कथं विग
र्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ३६ श्री छे ॥

राम: २६

रोहित्यं धर्मशीलैः अधर्मत्वात् किंच ब्रह्मवर्च उपव्ययं पूर्वसिद्धस्य ब्रह्मवर्चसस्य व्ययकरं प्रत्याख्यातुं च मादृशो नार्हती
त्याह कथं त्विति तेषां शिष्यः शिक्षणार्हः स एव प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते ३५ ननु पौरोहित्येन धनलाभाद्धर्मः
सिद्ध्येत् अन्यथा निर्धनस्य कुतो धर्मः अत एव तेन लोको हृष्यति तत्राह अकिंचनानां शिलोंछनं हि धनं क्षेत्रे स्वामिभिरुपेक्षितकणशो पादा
नं शिलः उंछः कादीपतितव्रीह्यादेरुपादानमुंछनं इह गृहाश्रमे तेनैव निर्वर्तिता साधूनां सत्क्रिया यने ३६ श्री छे

कियदेतत्प्रार्थितमल्पमेव अल्पमधिकमपि करिष्यामीत्याह भगवतामपि ३७ समाधिना परमेणैव ३९ वैष्णव्या श्रीनारायण
कवचात्मिकया ३९ असुरचमूः दैत्यसेना ४० अष्टमे विश्वरूपस्तु वर्मनारायणात्मकं इंद्रायप्राह येन

तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ३७ तेभ्य एवं प्र
तिश्रुत्य विश्वरूपो महातपाः पौरोहित्यं वृतश्चक्रे परमेण समाधिना ३८ सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्य
या आच्छिद्यादान्महेंद्राय वैष्णव्या विद्यया विभुः यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः तां प्राह स महेंद्रा
य विश्वरूप उदारधीः ४० ॥ यया गुप्तः सहस्राक्षः
सवाहान् रिपुसैनिकान् क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियं १ भगवंस्तन्ममाख्याहि वर्म नारायणात्म
कं यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे २ वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते नारायणा
ख्यं वर्माह तदिहैकमनाः शृणु ३ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः कृतस्वांगकरन्या
सो मंत्राभ्यां वाग्यतः शुचिः नारायणमयं वर्म संनह्येद्भय आगते ४

रो गुप्तो दैत्यानजयत् त्रिलोक्याः संबंधिनीं श्रियं १ २ ३ मंत्राभ्यां अष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वांगेषु करयोश्च न्यासो
येन नारायणमयं परं वर्म संनह्येत् बध्नीयात् ४

Indira Gandhi National
Centre for the Arts

ना०१०स०
२७

तत्राष्टाक्षरेणपादाद्यष्टांगेषुन्यासमाह पादयोरितिसार्द्धेनप्रणवसंपुटितमोंकाराद्येकैकमक्षरंविन्यसेत् ५ विपर्ययंच
यावन्मूर्द्धादिपादांतं वाविन्यसेत् उत्पत्तिन्याससंहारन्यासंवाकुर्यादित्यर्थः ६ द्वादशाक्षरस्योद्धारः प्रणवादियकारां
तमितिप्रणवसंपुटितमेकैकमक्षरंदक्षिणतर्जनीमारभ्यवामतर्जनीपर्यंतमंगुलीषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोरंतपर्वसु

पादयोर्जानुनोरूर्वोरुदरेहृद्यथोरसि मुखेशिरस्यानुपूर्व्यादोंकारादीनिविन्यसेत् ५ ॐनमोनारायणाये
ति विपर्ययमथापिवा करन्यासंततःकुर्यात् द्वादशाक्षरविद्यया ६ प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु न्य
सेद्धृदयॐकारंविकारमनुमूर्द्धनि ७ षकारंतुभ्रुवोर्मध्येणकारंशिखयादिशेत् वेकारंनेत्रयोर्युंज्यान्नकारंसर्व
संधिषु ८ मकारमस्त्रमुद्दिश्यमंत्रमूर्तिर्भवेद्बुधः सविसर्गंफडंतंतुसर्वदिक्षुविनिर्दिशेत् ९
आत्मानंपरमंध्यायेत् ध्येयंषट्शक्तिभिर्युतं विद्यातेजस्तपोमूर्तिमिमंमंत्रमुदाहरेत् १० ॐहरिर्विदध्या
न्ममसर्वरक्षांन्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः १०

राम:
२७

न्यसेत् मंत्रांतरन्यासमाह न्यसेदिति ७ षकारणकारयोर्विश्लेषेणषडक्षराणिहृदयादिषुन्यसेत् ८ मकारमस्त्रमुद्दिश्यध्यानात्म
कारास्त्रोक्तः अस्त्रायफडितिसर्वदिग्बंधंविनिर्दिशेत् ९ ध्येयमीश्वररूपमात्मानंध्यायेत् षट्शक्तिभिः ऐश्वर्यादिभिर्लक्षणाश्च
द्भिः विद्याबलेतेजश्चतपश्चमूर्तिर्यस्यतं इमंवक्ष्यमाणंश्रीनारायणकवचाख्यं अष्टगुणअणिमाद्यष्टैश्वर्ययुक्तः १०

यादसांगणेभ्योवरुणस्यपाशात्तस्मात् अटवीष्वाजिमुखंसंग्रामोपद्रवश्च आदिर्येषांतेषुसंकटस्थानेषु ११ १२ असौप्रसिद्धोवराहो
मामध्वनिरक्षतु यद्वेरवयस्तैरवद्यवस्तैः कल्पितैर्निरूपणइतितथा उन्नीताउद्धृताधारायेनसः अद्रिकूटेषुगिरिशिखरेषुभ्रा
मेषुमदशाः १३ उग्रधर्मादित्रिविक्रमादित्यरक्षणात् दासान्तगर्वितन्नरः अवतुदत्तोदक्षात्रेयः अयोगात्योगभ्रंशात् १४ पथियद्देवा

जलेषुमांरक्षतुमत्स्यमूर्तिर्यादोगणेभ्योवरुणस्यपाशात् स्थलेषुमायावटुवामनोव्यात्त्रिविक्रमःखेवतुविश्वरूपः ११
दुर्गेष्वटव्याजिमुखादिषुप्रभुःपायान्नृसिंहोसुरयूथपारिः विमुंचतोयस्यमहाट्टहासंदिशोविनेदुर्न्यपतंश्चगर्भाः
१२ रक्षत्वसौमाध्वनियज्ञकल्पः स्वदंष्ट्रयोन्नीतधरोवराहः रामोद्रिकूटेष्वथविप्रवासे सलक्ष्मणोव्याद्भरताग्र
जोस्मान् १३ मामुग्रधर्मादखिलात्प्रमादान्नारायणःपातुनरश्चहासात् दत्तस्त्वयोगादथयोगनाथः पायाद्गुणे
शःकपिलःकर्मबंधात् १४ सनत्कुमारोऽवतुकामदेवाद्धयशीर्षामांपथिदेवहेलनात् देवर्षिवर्यःपुरुषार्चनांत
रात्कूर्मोहरिर्मांनिरयादशेषात् १५ धन्वंतरिर्भगवान्पात्वपथ्यात् द्वंद्वाद्भयादृषभोनिर्जितात्मा यज्ञश्चलो
कादवताज्जनांतात् बलोगणात्क्रोधवशादहींद्रः १६ द्वैपायनोभगवानप्रबोधाद्बुद्धस्तुपाखंडगणप्रमादात्क
ल्किःकलेकालमलात्प्रपातुधर्मावनायोरुकृतावतारः १७ ॥ श्री

नोरक्षणंमत्स्यकारमत्स्यावगमनतस्मात् पुरुषार्थनसंभ्रमात् देवहेलनाच्छिद्रात् पातिंद्राद्धयग्रीवरूपान्नारदः १५ लोका
त्प्रायवारायज्ञः जननिमित्तोयोऽनुउपघातः तस्मादनंतः अवतात् हंतांतादितिपाठेकृतांतात्कालात्हरतु क्रोध
वशात्सर्पाणांगणादहींद्रःशेषः १६ कालमलान्नृतात्कलेः धर्मावनायधर्मरक्षार्थंस्वीकृतावतारः प्रोक्तोऽवतारैर्येन १७॥

Indira Gandhi National
Centre for the Arts

भा०षं०स० दिनस्य षट्सु भागेषु क्रमेण प्रातरादिसंज्ञेषु रात्रेश्च प्रदोषादिसंज्ञेषु रक्षां प्रार्थयते मां केशवइति त्रिभिः आसंगवं संगव
२८ मभिव्याप्य १८ त्रिधामा ब्रह्मादित्रिमूर्त्तिः श्रीमाधवः दोषो प्रदोषे अर्द्धरात्रिपर्यंतेकाले निशीथे च एक एव पद्मना
भोऽवतु १९ अपररात्रे ईशः श्रीवत्सधामा चतुर्षु सुपर्द्दिशः श्रीजनार्द्दनः श्रीदामोदरः प्रातो श्रीविश्वेश्वरोऽनुसंध्ये २० यु
गांतानलवत् तिग्मातीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सत् अरिसैन्यं दंदग्धि अतिशयेन दहतितस्माद्यस्य सा वएव न कुतस्मा

मां केशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः १८
देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो मां दोषे हृषीकेश उतार्द्धरात्रे निशीथ एकोऽवतु पद्मनाभः
१९ श्रीवत्सधामाऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्द्दनः दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्का
लमूर्त्तिः २० चक्रं युगांतानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तं दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो
हुताशः २१ गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चू
र्णय चूर्णयारीन् २२ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् दरेंद्र विद्रावय कृष्णपूरितो भीम
स्वनोऽरेर्हृदयानि कंपयन् २३

रामः
स्वार्थनीयमित्यर्थः यद्वा दंदग्धीति लोण्मध्यमपुरुषः अत्र त्वमेवेत्यं तं चक्रमिति स्वरूपस्य मुख्यसंबोधप्रार्थ्यते अतिशयेन दहे २८
ति कक्षं शुष्कतृणं २१ अशनिवत्स्पर्शो येषां ते विस्फुलिंगा यस्याः तस्याः संबोधनं हे गदे त्वमजितस्य प्रियासि अहं अ
च्युतस्य दासः अतः कूष्मांडादीन्निष्पिंढि निष्पिंढि विशेषेण चूर्णय अरींश्च चूर्णय सर्वत्र वीप्सा अतिशीघ्रताय २२ हे दरें
द्र पांचजन्य त्वं यातुधानादीन् विद्रावय विप्रग्रहाः ब्रह्मराक्षसाः ये भीषघोरदृष्टयस्तान् २३ श्री

तिग्मा धारा यस्य हे तिग्मधार असिवर खड्ग अष्टत्वं मम अरिसैन्यं छिंधि छिंधि चिन्न त्वं चंद्राकारा अलिं कुलानि यस्मिन् हे सतचंद्र चर्मन् त्र
त्वं नामघतां द्विषां चक्षूंषि छादय पापचक्षुषां पापदृष्टीनां चक्षुंषि २४ यत् ये भो भयं ग्रहेभ्यः पापेभ्यः २५ अथ प्रतीयका
हृष्ट्वा ख्यातकारर्द स्तोत्रा ऋणिरहद्यं तरादि सामानि वितेः स्तोमतेः सहस्तूयत इति स्तोत्रस्तोमः छंदोमयो वेदमूर्त्तिः सुपर्णोपि गरु
त्मानि सादिश्रुतेः देवमध्यपावेस्तोमभागीनि इहत्कारणाणि स्तोमः तत्स्तोमेति पावेसामाध्यस्तूयत्सकृत्स्तोमः २७ नामानि रूपाणि

त्वं तिग्मधाराऽसिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि चर्मञ्छतचंद्र छादय द्विषामघोनां हर पापचक्षु
षां २४ यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव वा सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा २५ सर्वाण्येतानि भग
वन्नामरूपास्त्रकीर्त्तनात् प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः २६ गरुडो भगवान्स्तोत्र स्तोभः छंदोमयः प्रभुः र
क्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः २७ सर्वापद्भ्यो हरेर्नाम रूपयानायुधानि नः बुद्धींद्रियमनः प्राणान् पांतु पा
र्षदभूषणाः २८ यथा हि भगवानेव वस्तुतः सदसच्च यत् सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः २९ यथैकात्म्या
नुभावानां विकल्परहितः स्वयं भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ३० तेनैव सत्यमानेन सर्वज्ञो भगवा
न्हरिः पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ३१ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः प्रहाप
यंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ३२

यथा नि पवाद् नामानि आयुधानि च नो बुध्यादीन् पांतु पार्षदभूषणाः पार्षदमुख्याश्च पांतु २८ सच्च असच्च स्थूलं सूक्ष्मं यत् तत् सर्वं
जगत् २९ एकात्म्यस्यानुभावोऽनुभवः येषां विकल्पो भेदरहितोपि ३० सत्यमानेन सत्यत्वेन प्रमाणेन ३१ पुनरपि श्रीनृसिं
ह एव प्रार्थ्यते विदिक्ष्विति पाह्निसनुषंगः यद्वा नारसिंहः प्रह्लादः स्वनेन श्रीनृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेन ग्र श्री
स्तानि समस्तानि दिव्यतेजांसि येन ता... छै:
स्तानि समस्तानि दिग्भिंतराजविषय येन ता...ज्ञानिनो ...दांतोमंगलितुकादीनोतरस ३२

भा०६०अ० दंशितः कवचित ३३ सोपि साध्वसाद्भयाद्विमुच्यते ३४ तस्य तु भयं भवदेव ३५ एतद्विद्यावत्तावमितिहासेनाह इमामिति
२९ सार्द्धत्रिभिः मरुस्थलनिरुदकेदेशे अनेन विद्याधाः क्षेत्रतीर्थानिपेक्ष्यत्वंदर्शितं ३६ यत्र द्विजस्य क्षयो देहत्यागः तस्योपरि ३७

मद्यवल्लिद्मास्थाय वर्मनारायणात्मकं विजेष्यस्यंजसायेन दंशितोसुरयूथपा ३३ एतद्धारयमाणस्तु यंयंपश्यतिचक्षुषा पदावासंस्पृशेत्सद्यः साध्वसात्सविमुच्यते ३४ नकुतश्चिद्भयंतस्य विद्यांधारयतोभवेत् राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्चकर्हिचित् ३५ इमांविद्यांपुराकश्चित्कौशिकोधारयन्द्विजः योगधारणयास्वांगं जहौसमरुधन्वनि ३६ तस्योपरिविमानेन गंधर्वपतिरेकदा ययौचित्ररथःस्त्रीभिर्वृतोयत्रद्विजक्षयः ३७ गगनान्न्यपतत्सद्यः सविमानोह्यवाक्शिराः सवालखिल्यवचनादस्थीन्यादायविस्मितः प्रास्यप्राचीसरस्वत्यां स्नात्वाधामस्वमन्वगात् ३८ यइदंशृणुयात्कालेयोधारयतिचादृतः तंनमस्यंतिभूतानि मुच्यतेसर्वतोभयात् ३९ एतांविद्यामधिगतो विश्वरूपाच्छतक्रतुः त्रैलोक्यलक्ष्मींबुभुजेविनिर्जित्यमृधेसुरान् ४० रामः
२९

सद्यः तत्क्षणमेवगगनान्न्यपतत् पातानंतरंस्त्रीभिः सह वालखिल्योपदेशात्तस्यास्थीनिप्राच्यां सरस्वत्यांप्रक्षिप्यविस्मितः सन् स्वं धामगंधर्वलोकंजगाम ३८ ३९ अधिगतः प्राप्तः सन् ४०

नवमे विश्वरूपेहते शक्रेणकोपतः त्वष्टावोत्पादितेवृत्रेभीतैर्देवैर्हरिःस्तुतः १ सोमस्यपानंपानंयस्मिन् एवंसुरापीथं अन्नमत्तीत्यन्नादं अत्रविश्वरूपोवैत्वाष्ट्रः पुरोहितोदेवानामासीदित्यादिश्रुतिरनुसंधेया १ तस्यासुरपक्षपातमाह सचासौ इति द्वाभ्यां प्रत्यक्षं प्रकटं यथाभवति तथा सवितर्यंदेवेभ्योहविर्भागं इंद्रायेदं अग्नये इदमित्युच्चैरवदत् यस्य पितरो देवाः २ असुरेभ्यस्तु परोक्षं गुप्तं भागं ददौ ३ तदेवाह देवान्यजमानोसावसुरान्प्रतिभागमवहत् ३ ४ तौ वा रिपि प्रभुः समर्थः तथापि

तस्यासन्विश्वरूपस्यशिरांसित्रीणिभारत सोमपीथंसुरापीथं मन्नादमितिशुश्रुमः १ सवैबर्हिषिदेवेभ्यो भागंप्रत्यक्षमुच्चकैः अवदद्यस्यपितरो देवाःसप्रश्रयंनृप २ सएवहिददौभागं परोक्षमसुरान्प्रति यजमानोवहद्भागं मातृस्नेहवशानुगः ३ तद्देवहेलनंतस्य धर्मालीकंसुरेश्वरः आलक्ष्यतरसाभीतस्तच्छीर्षाण्यच्छिनद्रुषा ४ सोमपीथंतुयत्तस्यशिरआसीत्कपिंजलः कलविंकःसुरापीथ मन्नादंयस्सतित्तिरिः ब्रह्महत्यामंजलिनाजग्राहयदपीश्वरः ५ संवत्सरांतेतदघं भूतानांसविशुद्धये भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धाव्यभजद्धरिः ६ भूमिस्तुरीयंजग्राह खातपूरवरेणवै ईरिणंब्रह्महत्याया रूपंभूमौप्रदृश्यते ७

याह ५ संवत्सरंतथैवस्थित्वा संवत्सरांतेभूतानांमध्येविशुद्धयेकोपावादपरिहारार्थंसहरिरिंद्रो भूम्यादिभ्यस्तत्रैदघ्यविभज्यददौ ६ तीरीयंचतुर्थभागं खातस्यपूरणंवरंतेनवरेणयदिखातपूरणंस्वतएवभविष्यति तद्दिदिशा[illegible] ७ श्री[illegible]

रा०७० स० यद्येदे सति पुनर्विरोहः प्ररोहो नवावितिवरेण निर्यासरूपेण ब्रह्महत्यायां दृष्टत्वात् निर्यासो न भक्ष्यः ८ शश्वत्कामवरेण यावत्
३० प्रसवं गर्भेऽप्युपवासेनैव संयोगवरेण अत एव रजोदर्शने तत्संगादि न कार्यं ९ द्रव्यभूयोवरेण यस्मिन् द्रव्ये क्षीरादावापो मि
श्रीभवेयुः तस्य भूयस्त्वमाधिक्यं स्यादिति वरेण यद्वा स्वस्यैव निर्विरोहमाद्नान्तरयस्त्ववरेण द्रव्यभूयस्त्वनिपातोऽपायमेवार्थ्यन्यथा
इव भूयस्त्वं सा सिद्धिकदर्थं तेन वरेण अस्य विभागस्य विश्वरूपोवैवाश्वस्य सांक्रतावनुक्तेः तद्विभागफलमाह तसां पहरन्ति
रोकारो तिकः फेनबुद्बुदादिजलामदिः प्रक्रियन्तीत्यर्थः यद्वा फेनजलं पापं हरन्ती आसन्निति प्रत्यासत्तीत्यर्थः अयं च तस्मा

तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ८ शश्वत्कामवरेणांह
स्तुरीयं जगृहुः स्त्रियः रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ९ द्रव्यभूयोवरेणाऽपस्तुरीयं जगृहुर्मलं
तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् १० हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे इन्द्रशत्रो विवर्द्धस्व मा
चिरं जहि विद्विषं ११ अथाऽन्वाहार्यपचनादुत्थितो घोरदर्शनः कृतान्त इव लोकानां युगान्तसमये यथा १२

दायोन पतिग्रहस्यादि काल्पसर्वत्र कर्म पाठान्तरे हरिक्लिन्विदंद्रगापं ११ इन्द्रायेन्द्रं हन्तु शत्रुश्चेन्द्रशत्रुः तस्मै तदाह इन्द्रशत्रो विव राम: ३०
र्द्धस्वेति अत्रेन्द्रशत्रुपदस्याद्युदात्तत्वात् बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्मृतेर्बहुव्रीहिलक्षणपतत् इन्द्र एव तस्य शत्रुरभू
त् तत्कर्मफलत्वात् यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्द्धस्वेति तस्मादस्येन्द्रः शत्रुरभवदिति तत्तथा च शिक्षायां मन्त्रो हीनः स्वरतो वर्णतो वा मि
थ्या प्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति ११ अन्वाहार्यपचनाद्दक्षिणाग्नेः १२

तेवी द्याविभ्रस्तलोकाद्राहितो विद्रुबुद्धुरितवमेनाम्त्यः कथंभूतं विष्वक्समंततः इषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानं ११ दग्धशैलप्रती
काशं हल्लवर्णं संध्याभ्रानीकवद्वर्चो दीप्तिर्यस्य तं १३ तप्तताम्रवत्शिखाः श्मश्रूणि यस्य मध्याह्नार्कवदुग्रे लोचने यस्य १४ रोदसी
आरोप्येत्यर्थः १५ दरीवद्गंभीरेण वक्त्रेण मुकुंजमानमिवस्वयः कथंभूतेन नभस्तलं पिबता जिह्वाग्रेण जिह्वया लिहता भुवनत्रयं य

विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसं १३ तप्तताम्रशिखाश्मश्रुं
मध्याह्नार्कोग्रलोचनं १४ देदीप्यमाने त्रिशिखे शूलमारोप्य रोदसी नृत्यंतमुन्नदंतं च चालयंतं पदा महीं
१५ दरीगंभीरवक्त्रेण पिबता च नभस्तलं लिहता जिह्वयार्क्षाणि ग्रसता भुवनत्रयं १६ महता रौद्रदंष्ट्रेण जृंभमा
णं मुहुर्मुहुः वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दिशः १७ येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्तिना स
वै वृत्र इति प्रोक्तः पापः परमदारुणः १८ तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सो
ऽप्यग्रसत्तानि कृत्स्नशः १९ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः २०

सता १६ महता वीसलिलनिरोधादंष्ट्रा यस्मिन् १७ वृत्रनामनिरुक्तिं येनावृता इति त्वाष्ट्री मूर्तिर्यस्य तपसः तेन तथा च श्रुतिः
स इमांल्लोकानावृणोद्यदिमांल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वमिति अयमसत्संकल्पितवान् १९ ग्रस्तं तेजो येषां प्रत्यंचं तत्र्यामिणं ग्रिदु
व नस्पतेन ध्यानत्वात् क्वापि गमनासंभवात् तत्रैव स्थिता तुष्टुवुरित्यर्थः महाभये परित्राणमन्यतेन्द्रवेदिति हरिमेव प्रपद्य
ते सुराः शरणमातुरः २०

Indira Gandhi National
Centre for the Arts

वाय्वादीनिपंचमहाभूतानि त्रैलोक्यनिलोका यो लोकास्तेषामधिपतयः ब्रह्मादयश्च सन्तो वयं भीतास्तस्मै चकिताः सर्वे सयस्मै अंतकाय कालायो द्विजंतः संतोबलिंहराम असावपि यस्मा द्विभेतितिततः परमेश्वरादेव नोस्माकं शरणं शरणं रक्षणम स्तु २१ ततएवैतस्यधारणेहेतु माह: अविस्मितं निरहंकारकं तुल्लश्रयं सधाकुतः शांतंरागादिशून्यं लब्धकूतः स्वेनैवलाभेन परिपूर्णकामं लब्धकुतः समं उपाधिपरि छेदशून्यं एवंभूतमीश्वरं विनाअपरंयः शरणार्थमुपसर्पतिसहिबालिशोज्ञः यतोसौश्वलांगूलेनपुच्छेन समुद्रमतितितर्तिहिअतीत

वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयोयेवयमुद्विजंतः हरामयस्मैबलिमंतकोसौ बिभेतियस्मा दरणंततोनः २१ अविस्मितंतंपरिपूर्णकामं स्वेनैवलाभेनसमंप्रशांतं विनोपसर्पत्यपरंहिबालिशः श्वलांगुले नातितितर्तिसिंधुं २२ यस्योरुशृंगेजगतींस्वनावं मनुर्यथाबध्यततारदुर्गं सएवनस्त्वाष्ट्रभयाद्दुरंतात् त्राता ऽश्रितान्वारिचरोपिनूनं २३ स्वयंपुरास्वयंभूरपिसंयमांभस्युदीर्णवातोर्मिरवैःकराले एकोरविंदात्पतित स्ततारतस्माद्भयाद्येनसनोस्तुपारः २४ 

र्दुस्तरतीत्यर्थः यथा तेन समुद्रतरणं न भवति तथान्यस्मादीश्वराश्रयणेन भवसागरतरणं न भवतीति भावः २२ महाभये स एव रक्ष कइतिदृष्टांतमाह यस्य महाशृंगे जगतीं पृथ्वीमेव स्वनावं बद्ध्वा मनुः सत्यव्रतोयथावत् दुर्गं संकटं ततार स एव वारि चरो मत्स्यमूर्तिः नोस्मानाश्रितान् नूनं त्राता रक्षिष्यति २३ स यमं संयमेप्रलयोदके उदीर्ण स एव नः पारे स्तरणे कृतैः वातैर्ये ऊर्मयस्तेषां रवैः कराले भयंकरे अरविंदाद् नाभिकमलात् पतित प्रायः एकः असहायएवतस्माद्भयाद्येन ततार स एव नः पारस्तारको स्तु २४

किंच वयं यस्यावतैव सृष्टाः पालिताश्च बभूवुः अतस्तमेव शरणं व्रजामेत्याहु: यःपकृतिभिर्निजैः येनानुसृष्टास्ते संतो विश्वसृजो मन नुसर्वमेवस्रष्टारः नास्मो युष्माकमनुग्राहको स्ति तस्य दर्शनात्तदाहु: अस्मत्तः पुरः सर्वमिवांतर्यामितया समीहमानस्यापि यस्य लिंगं रूपं न पश्याम तत्र हेतुः पृथक् यगीशा इत्यभिमानिनः देवादिषु उर्ध्वपदपरस्पुरामय त्स्परामदितनुभिः कृतावतारः सन् आत्मसात्कृत्वा पाति

यएकईशोनिजमाययानः ससर्जयेनानुसृजामविश्वं वयंनयस्यापिपुरःसमीहतः पश्यामलिंगंपृथगीशमा निनः २५ योनःसपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषुनित्यएव कृतावतारस्तनुभिःस्वमायया कृत्वात्मसात्पाति युगेयुगेच २६ तमेवदेवंवयमात्मदैवतं परंप्रधानंपुरुषंविश्वमन्यं व्रजामसर्वेशरणंशरण्यं स्वानांसनो धास्यतिशंमहात्मा २७ इतितेषांमहाराज सुराणामुपतिष्ठतां प्रतीच्यांदिश्यभूदाविःशंख चक्रगदाधरः २८ आत्मतुल्यैःषोडशभिर्विनाश्रीवत्सकौस्तुभौ पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं॥ २९ दृष्ट्वातमवनौसर्व ईक्षणाह्लादविक्लवाः दंडवत्पतिताराजन् शनैरुत्थायतुष्टुवुः ३०। छ

च २८ आत्मेति तं देवं ते कुत्र विश्वं विश्वात्मकं तथापि विकारं वारयंति अन्यं विश्वात्मने हेतुः परं कारणं ननु प्रधानपुरुषश्च विश्वस्य कारणं तत्राहु: प्रधानं पुरुषं च तदात्मकोपि स एवेत्यर्थः स एव नः संविधास्यति २७ प्रतीच्यां दिशि विद्धि विषयममा विस्मृत पुनश्च तं पुरो दृष्ट्वा ईक्षणाह्लादेन विक्लवाः मत्तोद्दरवत् पतिताः मंत्रः सहैव भायश्च तुष्टुवुरित्यर्थः २८। २७ २९ कथंभूतं श्रीवत्सकौस्तुभौ विना आत्मतुल्यैः षोडशभिः परितः सेवितं उन्निद्रशरदंबुरुहवदीक्षणे यस्य तं २९। ३०। छ

भा०ष०स०
३२

यज्ञोपवीर्यं स्वर्गादिफलजननसामर्थ्यं यस्य तस्मै नमः वयसे उत तत्फलपरिच्छेदककालरूपिणे तद्विघातकेषु दैत्येषु अस्तं प्रक्षिप्तं च
क्रं येन एवंभूताय सुपुरुहूतये बहूनि हूतयो नामानि यस्य ३१ ननु मम गुणातीतं विहाय गुणोपाधिकं यज्ञवीर्यत्वादिकं किमिति वर्ण्य
ते तत्राह यत्तव गुणत्रयस्पर्शिनस्तुरीयं त्रिगुणात्मिकानां तिसृणां गतीनां परमं पदं निर्गुणस्वरूपं तत् विसर्गस्य अर्वाचीनः इदानींतनः हे धातः
वेदितुं नार्हति अतः केवलं तस्मै ते नमोऽस्तु ३२ पितामहादीनपि याञ्चामीयं ते हरे गुणाः ऽतिपद्यैरत्युष्टतः सद्योगद्यैन स्तुवुः नम इति केण

नमस्ते यज्ञवीर्याय वयसे उत ते नमः नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ३१ यत्ते गतीनां तिसृणा
मीशितुः परमं पदं नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ३२ ॐ नमस्तेऽस्तु भगवन्नारायण वासुदेवादिपुरुष महा
पुरुष महानुभाव परममंगल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीना
थ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमः कपा
टद्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ३३ दुःखबोध इव तवायं विहारयोगो य
दशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ३४

नकुधा संबोधयन्तो दुर्ज्ञेयत्वं प्रपञ्चयति भगवन्नित्यादिना परमेमंगलेश्वधोधर्मीयस्मिन् आत्मयोगेन यः समाधिः चित्तैकाग्र्यं तेन परिभावि
तः सुष्ठु मीलितः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेन उद्घाटितं तमोरूपं कपाटं यस्मिन् द्वारभूते चित्ते अपावृते प्रकटे आत्मलो
के प्रसद्रूपे स्वयमेवोपलब्धमस्त्रिवं कं च निजसुखं तदनुभवरूपो भवान् ननु केवलानुभवरूपत्वे मम सृष्ट्यादिकर्तृत्वं कर्तृत्वं कथं तत्राह
दुःखबोध इव तवायं विहारयोगः क्रीडायोगः यद्यस्मात् अशरणो निराश्रयः इदं विश्वं अनवेक्षितो स्माकं समवायो मेलनं साहाय्यं येन सः ३४ राम: ३२

दुर्ज्ञेयत्वांतरमाह अथेत्येति यथेह देवदत्तो गृहादि निर्माय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते एवं भवान् ब्रह्मस्वरूपो जीव
रूपेण गुणविसर्गपतितः सन्नुपादत्ते यद्वा समञ्जसं अप्रच्युतं दर्शनं चिच्छक्तिर्यस्य स भवान् उदास्ते उदासीन साक्षितया वर्तत इति ३ तदे
वं विरोधेन दुर्ज्ञेयत्वं नु स्यात् तत्परिहारेण ज्ञानप्रकारमाह नहीति विरुध्यत इति विरोधः उभयं न विरुद्धमित्यर्थः न ह्यस्मदृष्टं तेन त्वयि
विकल्पो युज्यते अलक्ष्यैश्वर्यत्वादित्याह भगवतीति अपरिमिता गुणगणा यस्य तस्मिन्नीश्वरत्वे न चावगाह्यमतर्क्यं माहात्म्यं य
स्य तस्मिन् विकल्प एवं वा एवं चेति वितर्कः किमत्र युक्तमिति विचारस्तथ्यमेवेति तत्र प्रमाणाभासाः तदनुयायकाः कुतर्कास्त्र अर्वाची

अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतंत्र्येण स्वकृतकुशलाकुशलं फलमुपादत्ते आहोस्विदात्मा
राम उपशमशीलः समंजसदर्शन उदास्त इति ह वाव न विदामः ३५ नहि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्व
रेऽनवगाह्यमाहात्म्ये अर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलांतःकरणाश्रयदुरवग्र
हवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामंतर्धाय को न्वर्थो दुर्घट इव भवति स्वरूप
द्वयाभावात् समविषममतीनां मतमनुसरसि यथा रज्जुखंडः सर्पादिधियां ३६ ॥

नाव स्तत्स्वरूपासंस्पर्शिनो ये विकल्पादयस्तेये षु शास्त्रेषु तैः कलिलं आकुलं अंतःकरणं आश्रयो यस्य दुरवग्रहस्तेन वादिनां विवा
दस्य अनवसरे अगोचरे ननु अघामात्रमेतत युक्तिरप्यतां तत्राह उपरतो मायामयः संसारो यस्मिन् केवये व्यात्मना यामन्तर्धाने निवा
यको ऽर्थः कृतत्वादिर्न संभवति यदि वस्तुतः कर्तृत्वादिर्न संभवति यदि वस्तुतः कर्तृत्वादि भवेत् तर्हि विरोधः स्यात् ननु तद
प्रतीत्याह स्वरूपद्वयाभावादि ४ अनुग्रहनिग्रहादिकं तु तत्तन्मतिभेदेन तन्मायया त्वय्यपि स्फुरतीत्याह समविषमेति येषां
मतं मतिभाषां सर्पादिविषयाधीर्येषां यथा रज्जुखंडस्तत्पास्यते यद्वा तन्मेदाविरोधं पुरुषमतिभेदेन दर्शयति समविषयमेति ।५

Indira Gandhi National
Centre for the Arts

भा०६०स०
३३

तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाह । स एव हि नानारूपेण प्रतीतः वस्तुस्वरूपः सद्रूपः सर्वेषां गुणानां विलासैः प्रकाशैरुपलक्षितः ननु ते जीवा अपि लक्ष्यंते तेन सर्वप्रत्यगात्मत्वात् सर्वजीवांतर्यामित्वात् जडतादात्म्याभासेन जीवस्यापि जडप्रायत्वाल्लतेन विनाप्रकाशाशक्तिभावः पर्यवशेषितः नेति नेत्यादिश्रुतिभिः ३८ अतस्त्वद्भक्तिरेव परमपुरुषार्थ इत्याह अथहेति यद्येवं तेन यस्मादेवंभूतस्त्वं परमेश्वरः अथ ह वाव अत एव हि हे मधुमथन परमभागवता एते हि तव सदात्मनो भगवतोऽनुसेवां क

स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ३८ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यंदमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरंतरं निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्तः ३९

थं पुनः कुर्युः विसृजंतीत्यन्वयः स्वार्थे पुरुषार्थे कुशला निपुणाः आत्मा त्वमेव प्रियः सुहृच्च येषां ते साधवो रागादिशून्याः तत्र हेतुः तव महिमैवामृतरससमुद्रस्तस्य विप्रुषां बिंदुमात्रेण सकृदपि लीढया आस्वादितया स्वमनसि निष्यंदमानेनातिशयेन स्रवता यन्निरंतरं सुखं तेन विस्मारिता दृष्टश्रुतविषयाः सुखलेशाभासा येषां ते अत एव भगवति त्वयि नितरां निरंतरं निर्वृतमनसो येषां ते यत्र यस्यामनुसेवायां सत्यां ३९ राम:
३३

प्रकृतं विज्ञापयंति त्रिभुवनेत्यादिना याबत्समाप्तिः त्रिभुवनमात्मा स्वरूपं भवनं च यस्य त्रिभुवनस्यात्मा भवनं चेति वा त्रयो विक्रमा यस्य त्रीन् लोकान्नयतीति त्रयाणां लोकानां मनोहरोऽनुभावो यस्य एवं च दुर्घटसंबोधनमाह तेषामनुपक्रमसमयः उद्यमकालो न भवतीति न त्वाहे दंडधर सर्वं यथादंडं दधर्थ धृतवानसि एवमेवं त्वाष्ट्रमपि जहि यदि मन्यसे इच्छसि यदीच्छसि प्रथमं तावत्त्वदीया

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दंडं दंडधर दधर्थ एवमेनमपि भगवञ्जहि त्वाष्ट्रमुत यदि मन्यसे ४० अस्माकं तावकानां ततनतानां हरे तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चांतस्तापमनघार्हसि शमयितुं ४१

नामस्माकं अंतस्तापं शमयितुमर्हसि तावकानामस्मिन्हेतुः हे पितः हे पितामह तव चरणनलिनयुगलध्यानेनैवानुबद्धो हृदये निगडः शृंखला येषां स्वलिंगविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानां केन अनुकंपयानुरंजितं सानुरागं च विशदं रुचिरं च शिशिरं च स्मितं तत्सहितेनावलोकेन तथानुकंपयैव विगलितो मधुरो मुखरसः प्रियवाक् सैवामृतकला तया च ४१

Indira Gandhi National
Centre for the Arts

भा०ष०स० किंचास्मदभिप्रायस्त्वया ज्ञायत एव किमत्रास्माभिर्विज्ञापनीयमित्याहुः अथ हे भगवान्तवास्माभिरिह कियान्वार्थविशेषो
३४ विज्ञापनीयः स्यादित्यन्वयः यथा हिरण्यरेतसोऽग्नेस्तदंशभूतैः स्फुलिंगादिभिः प्रकाशो न क्रियते तथा तवास्माभिः कार्यार्थप्रकाशनं न कार्यमि
त्यर्थः अत्र हे भगवतो विशेषणानि अखिलजगदुत्पत्त्यादिषु निमित्तायमानया विनोदो यस्य अत एव सर्वजीवनिकायानामंतर्हृ
दयेषु ब्रह्मस्वरूपेण प्रत्यगात्मतया प्रीतद्रूपेण च बहिरपि प्रधानरूपेण देशकालदेहावस्थानविशेषानन्वत्तेष्ठानुभवतः कथं तेषा

अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनि
कायानामंतर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं
तदुपादानोपलंभकतयानुभवतः सर्वप्रत्ययसाक्षिण आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः किय
निह वार्थविशेषो विज्ञापनीयः स्यात् विस्फुलिंगादिभिरिव हिरण्यरेतसः ४२ अत एव स्वयं तदुपक
ल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृ
तानां वयं यत्कामेनोपसादिताः ४३ राम:
३४

मेवमुपादानतया उपलंभनेन कृत्वा च उपादानस्योपलंभकत्वयोक्त्वा अत एव सर्वेषां प्रत्ययानां बुद्ध्यादीनामपि साक्षिणः साक्षित्वे
हेतुः आकाशवत् अलिप्तं शरीरं स्वरूपं यस्य अलिप्तशरीरं स्वरूपं यस्य अप्रमत्वे हेतुः साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः शुद्ध
स्वरूपस्य ४० अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्य कार्यस्य कामेनोपसादिताः प्रापिताः तदस्माकं कार्यं स्वयमेवोपकल्पय
संपादयेति चरणमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैर्यः संसारपरिश्रमः तस्योपशमकं उपसृतानां प्राप्तानां ४१

सर्वज्ञेऽकरुणा स्त्र्यपेक्षितस्तत्कामं तं कामाह इति स्वकार्यं कथयंति अथो इत्यनंतरमेवाह ४२ शीघ्रं तद्घातयतु नः पुनः प्रणमंति हंसाय शु
द्धाय हृदये आविर्भवते नमः शुद्धत्वे हेतवः दहरनिलयाय हृदयाकाशनिकेताय निरीक्षकाय बुद्ध्यादिसाक्षिणे हंसाय संदानरूपा
यहुपिर्जीवावकः शब्देन ध्वनिरीति वाचकः तयोरैक्यं परं ब्रह्म हंसशब्दः सर्वज्ञ ध्यायत इति निरुक्तेः अनिर्दृश्यत्वे हेतवः महेशाय विंशोग्रो यस्य
निरूपकमायः आदिपुरुषाय सद्भिः संगृह्यत इति तथा तस्मै भवं पाथ भवरूपे पथि वर्तमानस्य जनस्य निजाश्रमाप्तासंस्संसा

अथोऽईश जहि त्वाष्ट्रं ग्रसंतं भुवनत्रयं ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च ४४ हंसाय दहनिलयाय नि
रीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय सत्संग्रहाय भवपांथ निजाश्रमाप्तावंते परीष्टगतये हरये नमस्ते ४५
अथैवमीडितो राजन् सादरं त्रिदशैर्हरिः स्वमुपस्थानमाकर्ण्य प्राह तानभिनंदितः ४६ श्रीभग
प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ४७ किं दु
राप मयि प्रीते तथापि विबुधर्षभाः मय्येकांतमतिर्नान्यत् मत्तो वांछति तत्त्ववित् ४८ न वेद कृपणः श्रेय आ
त्मनो गुणवस्तुदृक् तस्य तानिच्छतो यच्छेत् यदि सोऽपि तथाविधिः ४९

रस्यांतेष्टा सर्वतः पूजिता उत्तमा गतिः फलं यतस्मै ४३ अभिनंदितः संतोषितः ४४ मदीयमुपस्थानं स्तोत्रं तद्रूपया विद्यया
ज्ञानेन आत्मन ऐश्वर्यमसंसारित्वं तस्य स्मृतिर्यया न हि विरोध उभयमित्यादिना कर्तृत्वेन उक्तत्वादेर्मायिकत्वोक्तेः भक्तिश्च यया भ
वति ४५ अथ हे भगवन्नित्यादिनाऽत्युक्तेः सर्वोत्कर्षोक्तेः भक्तिमभिनंदति किमिति ४६ यदुक्तं देवैः स्वयं तदुपकल्पयास्माकमित्यादि
तत्संपादनं कृपालोर्ममानुचितमित्याशयेनाह न वेदेति द्वाभ्यां गुणेषु विषयेषु तत्त्वदर्शनि विषयान् तथाविधोऽज्ञ एव ४७

Indira Gandhi National
Centre for the Arts

भा०६०स० कर्मेत्यवक्तिप्रवृत्तिमार्गं न वक्तीति अपथ्यं यथा न राति न ददाति भिषक्तमः सद्वैद्यः १८ एवं तत्त्वकथने नानेकोक्तिभिः संवरिहृत्य तदभिप्रायमनु
३५ स्मरन्नाह मघवन्नित्य विद्याव्रततपसां च सारं दृढं गात्रं शरीरं याचत याचध्वं १९, तत्र तदीयां विद्यातिशयमाह स वा इति द्वाभ्यां
वैस्मनवग्रहिधाकथनित्वाप्याथर्वणदधीचः कर्पब्रह्मविद्ययोः दध्यंचं समुपागम्य नमश्चक्रुरथ्याश्विनौ नगवेन्द्रहिनौ विद्यामिति श्रुत्वा
स चाब्रवीत् कर्मण्यवस्थितो हाहं पश्चाद्दास्यामि गच्छतः तयोर्निर्गतयोरेव शक्र आगत्य मुनिं उवाच भिषजोर्विद्यां मा वदी
स चाब्रवीत् कर्मण्यवस्थितो हाहं पश्चाद्दास्यामि गच्छतः तयोर्निर्गतयोरेव शक्र आगत्य मुनिं उवाच भिषजोर्विद्यां मा वदी
र्यदि मद्वाक्यमुल्लंघ्य ब्रवीषि तर्हि सेवते त्वच्छिरश्छित्वाऽसंदेहः इत्युक्त्वा सयौ हरिः इंद्रे गते तथा तौ समागत्य अश्विनौ प्रार्थ्य

स्वयं निश्रेयसं विद्वान् नवक्त्यज्ञाय कर्म हि न राति रोगिणोऽपथ्यं वांछतोऽपि भिषक्तमः ५० मघवन्यात भद्रं वो दध्यंचमृषिसत्तमं विद्याव्रततपःसारं गात्रं याचत मा चिरं ५१ स वा अधिगतो दध्यङ् अश्विभ्यां ब्रह्म निष्कलं यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ५२।

र्द्विजं तन्मुखादिंद्रगदितं श्रुत्वा तत्वूचतुः पुनः अथावां तव शिरः छित्वा पूर्वमश्वस्य मस्तकां संधास्यावस्ततो ब्रूहि तेन विद्यां च तौ द्विज राम:
तस्मिन् निर्देशेन छिन्ने पुनः संधायं मस्तकं निजं तेन दक्षिणां दत्वा गमिष्याचो यथागतं एतच्छ्रुत्वा तं ततो वावदध्यांगाथर्वणस्तयोः ३५
पूर्वमश्वविद्यां च सम्यक् तेन समस्तं च कीर्तितमिति तत्र श्लोकार्थः दध्यंगनिष्कलं शुद्धं ब्रह्म अधिगतः ज्ञातवान् पाश्चात्ये तन्निरोक्तं तं नवति
धनेनं प्रवर्ग्यविद्यामधिगतः ज्ञातवान् ततोऽश्विभ्यां पादादिसुत्तरस्यानुसंगः उपदिदेशेत्यर्थः कथं चेत्तं ब्रह्म स्वहे अश्वशिरसा प्रोक्ता
त्वादश्वशिरो नाम प्रसिद्धं ब्रवीरमरतां जीवन्मुक्तं त्वं व्यधात् तथा च श्रुतिः अश्वस्य शीर्ष्णा प्रयत्तीमुवाचेति २० छै:

महात्मकं वर्म श्रीनारायणकवचं च अधिगत इति पूर्वस्यानुषंगः तत्र हेतुः यद्यस्मात् त्वष्टे प्रादात् किं तत् त्वष्टा विश्वरूपाय पुत्राय प्रादात्
कीदृशं यत् त्वं ततो विश्वरूपात् अधाः धृतवानसि तदेवं विद्यया सांगं गात्रं याचध्वमित्यर्थः २१ ननु प्रेष्ठं देहं कथं दास्यति तत्राह युष्म
भ्यं मया नियत्र वसथी नियामितः सन् दास्यति यतो धर्मज्ञः विशेषतोऽश्विभ्यां शिष्यप्रसादात् दास्यति अस्यानीतमनेन देयत्वं दर्शितं तैर

दध्यङाथर्वणस्त्वष्ट्रे वर्माभेद्यं महात्मकं विश्वरूपाय यत्प्रादात् त्वष्टा यत्त्वमधास्ततः ५३ युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः येन वृत्रशिरो हर्ता मत्तेजउपबृंहितः ५४ तस्मिन्विनिहते यूयं तेजोऽस्त्रायुधसंपदः भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान् ५५ २३ ... वेन वर्म

स्थिभिर्विश्वकर्मणा विनिर्मितः आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः येन भगवान् वृत्रस्य शिरो हरिष्यति मत्तेजसा उपबृंहितः स
न् २२ तस्मिन् निहते तेजश्च अस्त्राणि च संपदश्च भूयः प्राप्स्यथ महाकायस्त्रिभुवनग्रासी स एवास्मान् हन्यादिति शंकां कुर्वंतः तत्राह न मत्परा
न्वृके विनहिंसंति अतो युष्माकं भद्रमेवेति २३ इत्याद्ये द्विष्टद ... इस्थिज वज्रं तत्र ... सुरेणसन्निर्जरः ८।

भा०ष०स० मोदमान एवं तन्मुखाद्धर्मं श्रोतुकामः यत्प्रत्याख्यानं कृतवान् अपि नितरां वृन्दारकाः अपि किं संस्थायां मरणे योऽभिद्रोहो दुःसहः तं
३६ तत्र जानीथ ३ आत्मदेहः वयं जानीम एव किंतु श्रीविष्णुरस्मन्मुखेन याचते तस्मिन्नित्यत्र नाह याचते विश्वविद्यातुं क उत्सहेत ४ पुण्यश्लो
कैरीड्यानि कर्माणि येषां यावको यदि वेद तर्हि न याचेत यदीश्वरः दानसमर्थश्चेत्तर्हि सोपि नेति नाह अतो यथा तव संकटं वयं स्वा

इन्द्रमेवं समादिश्य भगवान्विश्वभावनः पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः १ तथाभिया
चितो देवैरृषिराथर्वणो महान् मोदमान उवाचेदं प्रहसन्निव भारत २ अपि वृन्दारका यूयं न जानीथ शरीरि
णां संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ३ जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः क उत्सहेत तं दातुं भि
क्षमाणाय विष्णवे ४ किं नु तद्दुस्त्यजं ब्रह्मन्पुंसां भूतानुकम्पिनां भवद्विधानां महतां पुण्यश्लोकेड्यक
र्मणां ५ ननु स्वार्थपरो लोको न वेद परसंकटं यदि वेद न याचेत नेति नाह यदीश्वरः ६ ऋषिरु० धर्मं वः श्रोतु
कामेन यूयं मे प्रत्युदाहृताः एष वः प्रियमात्मानं त्यजन्तं संत्यजाम्यहं ७ योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमा
न् ईहेत भूतदयया स शोच्यः स्थावरैरपि ८ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः यो भूतशोकहर्षाभ्या
मात्मा शोचति हृष्यति ९ अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिवि
ग्रहैः १० रामः
३६

र्थपरा न जानीमः एवं प्रत्याख्यानस्य मम तत्संकटं न जानासीति भावः ६ मे मया प्रत्युदाहृताः प्रत्युक्ताः मां त्यजन्तं त्वत्कार्यार्थमात्म
नं देहं ७ अध्रुवेणात्मना देहेन हे नाथाः ८ भूतानां शोके हर्षे च शोचति हृष्यति य आत्मा स्वयं तस्य यो धर्मः एतावानेवाव्ययः
सर्वः ९ परक्यैः श्वसृगालादिभक्ष्यैः अस्वार्थैः आत्मोपयोगशून्यैः स्वज्ञातयः विग्रहो देहः तैर्नोपकुर्यादिति यत् १०

कृतव्यवसितं निश्चयोनात्मा आत्मानं ब्रह्मणि संनयन्नेकीकुर्वन्तनुं जहौ ११ यताः अक्षादयो येन तत्त्वं परं पश्यतीति यथा ध्वस्तानि गतानि बंध
नानि यस्य १२ अथेन्द्रो वज्रमुद्यम्येत्यादेः अन्वयेः मुनेः शक्तिः अस्थिभिर्निर्मितं उत्सिक्तः उर्जितः मुनेः शक्तिभिरिति वा पाठः १३ अ

एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुं परे भगवति ब्रह्मण्यात्मानं संनयन्जहौ ११ यताक्षासुमनोबु
द्धिस्तत्त्वदृग्ध्वस्तबन्धनः आस्थितः परमं योगं न देहं बुबुधे गतं १२ अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा मुने:
शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः १३ वृतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत स्तूयमानो मुनिगणैस्त्रैलोक्यं
हर्षयन्निव १४ वृत्रमभ्यद्रवच्छक्त्या असुरानीकयूथपैः पर्यस्तमोजसा राजन्क्रुद्धो रुद्र इवान्तकं १५ ततः सुरा
णामसुरै रणः परमदारुणः त्रेतामुखे नर्मदायामभवत्प्रथमे युगे १६ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः
मरुद्भिरृभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिं १७ दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया नामृष्यन्नसुरा राजन्मृधे वृ
त्रपुरःसराः १८ नमुचिः शम्बरोऽनर्वा द्विमूर्धा ऋषभोऽसुरः हयग्रीवः शङ्कुशिरा विप्रचित्तिरयोमुखः १९ पुलोमा वृषपर्वा च प्रहे
तिर्हेतिरुत्कलः दैतेया दानवा यक्षा रक्षांसि च सहस्रशः २० सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः प्रतिषिध्येन्द्र
सेनाग्रं मृत्योरपि दुरासदं २१ अभ्यर्दयन्नसंभ्रान्ताः सिंहनादेन दुर्मदाः गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः २२

सुरानीकानां यूथपैः पर्यस्तं परिवृतं १५ रणः संग्रामः प्रथमे च चतुर्युगे त्रेतायुगस्य मुखे प्रारम्भे १६ १७ नामृष्यन् न सेहिरे १८ १९ २० २१ २२

Indira Gandhi National Centre for the Arts

भा०१०स० शतघ्नीवज्रचक्रगदाः स्वाल्लोहकंटकसंचिताः भुशुंडीः सर्वलोहकंटकाः भुक्षमो लोहतप्यशिखाते २३ पुंसो मूलदेशाः एकस्यापि ततस्ते लहयः इतरानपुरतो यथावर्तितथा तत्रस्थैः देवैः ज्योतिषीव सत्तेनातेषां तदादिः सूचिता २४ तामेवाह नतर्हित्रि स्थानामपाणां
३७ वयानि वषाणामतेषामेध्याः नासः रथाश्च तिर्यष्पश्च कारवा २५ क्षीणं अस्त्राणं चक्रवर्यायिषं माशिष्टे भुमैस्तपत्नैश्च २६ ता
मिस्रसेतिका स्त्रस्थाणां प्रस्थाणां चभुगेः संप्रदेरकृता नूदैतत्यस्यात स्वस्तिमतः पुरि नः भुमादिशिष्ठश्च पिंडतत्रिशाप्यदत्तोता

भल्लैः परस्वधैः शतघ्नीस्वड्गैः शतघ्नीभिर्भुशुंडिभिः सर्वतो वाकिरंछस्त्रैः रस्त्रैश्च विबुधर्षभान् २३ नतेदद्रूपतत्स
छन्नाः शरजालैः समंततः पुंखानुपुंखपतितैर्ज्योतीषीव नभोघनैः २४ नतेशस्त्रास्त्रवर्षौघापासेद् सुरसै
निकाः छिन्नाः सिद्धः पश्चदेवैर्लघुहस्तैः सहस्रधी २५ अथ स्त्रीणास्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः अभ्यव
र्षन्सुरबलं चिच्छिदुस्तांश्च पूर्ववत् २६ तानद्रयाः स्वस्तिमतो निरापत्रस्त्राश्च संगरे रथद्विनाथाः द्रुमैर्द
पद्भिर्विविधादिशृंगोरविद्रुतोस्तत्रसुरेंद्रसैनिकान् २७ सर्वेप्रयासाभ्रजवन्निमोघाः कृताकृतादिकाणो
पुंदेत्यैः कृष्णानुकूलेषु यथामहत्सु क्षुद्रैः प्रयुक्ताउसती रुक्षवाचः २८ तेस्वप्रयासं वितथं निरीक्ष्य ह
रावभक्त्या हरयुयुत्सवो युधः पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः २९ छै राम ३७

शोपयतानेनत्रमुक्तीलाः २७ कृताः कृताः पुनः कृताः कृत्नोऽनुकूलो येषां तेषु देवगणेषु उपसः अकस्मात् रुक्षाः परुषा वाचो यथा महत्
सु क्षुद्रकर्मिन्नवर्तितद्वत् २८ हतोयुद्धे दर्पो येषां आर्तैः परैर्हतानः सासो धैर्यं येषां तेऽप्रतिप्रतिष्ठा अपि दैत्या एवं तेहसापीत
रुक्मं आजिमुखे युद्धारंभे पतिं विसृज्य पलायनाय मनो दधुः यतो हताव जाता २९ छै श्री

प्रभावतः पलायमानात् येद्रूआदावेवतीत्रेण तेषाम पलायितुमस्य च तद्वं तसौ सेतत्त्वेत्स्माणां वध्यशेष ३० तदेवविधि
नष्टिकालोपपालाप्रवस्तरोच्चिताम्न विनोचिरंजयादितिग्रहमय हेऽत्र वर्तत्मैवार्थेऽष्टगुना ३१ ततो मृत्युः इह यत्राः लो
कः स्वर्गश्च यदि स्यात्तस्य न तर्हि अस्तु अस्तु सुरसम्भविनिश्चय त्वं ३२ अत्र संधारणयाक्लेवरं जह्यादि निश्चित्य एकोऽमृत्युः वीरा

हर्षेसुरांस्तानवगम्य सत्त्वैः प्रभावतः वेदस्वकृत्रेवहलत् पलायितंप्रेक्ष्य बलं च तत्त्वं नये नतीव्रेण विहस्य वीरः ३० का
लोपपन्नोऽरुचिरं मनस्विनां उवाच वाचं पुरुषः प्रवीरः हे विप्रचित्ते नमुचे पुलोमन्मयान्वर्त त्रंवरमेत एथ ३१
जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रियायस्यनचेह क्लृप्ताः लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तं ३२ द्वौ संमताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः कलेवरं योगरतो विजह्यात् यदग्रणीर्वीरशये
निवृत्तः ३३ श्री तदेवं भ्रूसतो धर्म्यं वच
: पत्युश्चेतसः निवारिताः नत्यजन्नतया पलायनपरा नृप १ विशीर्यमाणां पृतनामासुरीमसुरर्षभः कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् २ दृष्ट्वातप्यत संक्रुद्ध इंद्रशत्रुरमर्षितः तान्निवार्यौजसा राजन्निर्भ
र्त्स्येदमुवाच ह ३ छै

येरणप्रत्यैश्चमातिवृत्ताः अपराङ्मुखाः सन् जस्मीत्याक्षितियत् सचेकः तेदपविहस्य स्नेहेणसंमतोमृत्युतथाप्रसमृतिः वा
विप्रोपुरुषेकेलोके सूर्यमंडलभेदिनो परिव्राड्योगयुक्तश्च रणेचाभिमुखोहतः एकाद
शेऽतु इत्यस्य युध्यमानस्यावक्त्रेण वक्तिमानवलोहकोधिनाचाचो नुवर्णिताः शंसतः कथतः पत्युर्वच १ कालानुकूलैः काला
नुवर्तिभिः काल्यमानां निदाप्यमानां २ अमर्षितः असहमानः तंस्त्रिदशान्निवार्य निर्भर्त्स्य वेदं वक्ष्यमाणं उवाच ३। छै

Indira Gandhi National
Centre for the Arts

रा०१४स० तदारब्धासीमातुरवहितैः पुरीवपायैः प्रथमंत पाचेदेवानां संबोधनं हष्टोहतैः दैत्येकिं न्किं चित्तनयः शोनाधिधर्मो तदे
३८ वाहा नहीति ४ वधनेसंग्रामेसार्धैरे धैर्येहेतुर्ने काः कुद्धाः पाविरुणमाकं सप्रीतिहृष्टानवेदिद्लोकजोऽगैः स्पृहास्ति ५ सु

किं वज्रचरितैर्मातुर्धावद्भिः हष्टतोहरिः नहि जीतवधः श्लाघ्यो न स्वर्गः श्वरमाजितो ४ यदिवः प्रधने श्रद्धा
सा रवात्कुरु तेकात्ददि अथे तिष्ठतमात्रं मेनवेज्ञाम्यसुरेवस्प्रहा ५ एवं सुरगणान्कृद्धो नीचयन्वपुषा निवृत्त् व्यनद
त्सुमहाघाणो येन लोकाश्चिचेतसः ६ तेन देवगणाः सर्वे तत्र विस्फोटनेन वै निपेतुर्मूर्छितान्भूमौ यथैवाशनिताडिताः
७ ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः गां कंपयन्नुद्यतसालशाखी जसा नालंवनं यूथपतिर्यथोन्मदः
८ विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवतेमहागदो विक्षेपती मापततीं सुदु सहां जयाहवामेन करेण लील
या ९ संइद्रशत्रुः कुपितोऽभ्ससंतया महेन्द्रवाहं सगदं योयविक्रमः जघान कुंभस्थलउल्लसन्मृधेन त्कर्मसमवेसमहजय
न्नृप १० ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्भिः कुलिशाद्दतो यथा अपासरद्भिन्नमुखः सहेन्द्रो मुंचन्नसृक्सप्तधनुर्भृ
शार्तः ११ नसन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः सगदां महात्मा इन्द्रोऽमृतस्पंदिकराभिमर्शवीतव्यथक्षतवाहोऽवत
स्थे १२
राम:
३८

राणान्नरिक्षनसुमहान्प्राणो बलंयस्य येनविचेतसोवनबुः ६ उद्यतं प्रलयेन नालं नलानांचनं उक्तोमदोयस्य सयूथ
पतिर्गजोयथा न सहदिति ८ ९ सप्तधनुः प्रमाणं दिशो ११ सतोऽचसन्नो वाहोयस्य तस्मै नप्रायुंक्ता अमृतसंदीअमृतश्रावी
यः स्वकरः तेनाभिमर्शः स्पर्शः तेन वीतव्यथोगतरुः स्वक्षतो वाहोयस्य इंद्रस्य तथाभूतोऽवतस्था १२

स्थतः देत्यपेंद्र आरब्धकाम्ययायुद्धेच्छयाऽवस्थितं आतृहणं भ्रातुर्हरं विश्वरूपं संज्ञार वृत्रोऽसंस्कृत्य तदेवाद पापं तस्य कर्मास्मरन् योव
स्महावाक्षणेब्राह्मणंस्त्वनाभ्यितेषुतस्य गुरुं समवन्नातरं सज्जवानयद्देतः समवस्थितः एतदिच्छान्तइंजातंदिइ श्लेष्मयमानंदा
यैहिरसतपसमक्षते नतिर्भिन्नहृष्ट्वलसंरक्षन्तहृदयं यस्पेतेन न त्वयाभिसिलन्स्रोन अद्याक्रविरादेव भ्रातुरनृणोऽहं स्यां एत्तद्वृष्ट्या १४
स्वर्गकामोयोऽनवानृज्ञक्षस्वर्गकामोयाज्ञिकः परोऽरवेतिवा १५ तं त्वामस्पष्टवन्दिस्मबृदेहं समदंति वर्त्तमानसाधीपवर्त्तमान

सतं नृपेशाद्धवकाम्ययारिंपुरयायुधं भ्रातृहणं विलोक्य स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसन्जगाद १३
दिष्ट्या भवान्मेसमवस्थितोरिपुर्योब्रह्महा गुरुहा भ्रातृहा च दिष्ट्यानृणोद्याद्दमसत्तमत्कृतनिर्भिन्नदृष
दहाचिरात् १४ यानोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य विश्रभ्य खड्गेन शिरांस्यवृश्चत्पशोरिवाऽक
रुणः स्वर्गकामः १५ ह्रीश्रीदयाकीर्त्तिभिरुज्झितं त्वां स्वकर्मणापुरुषादैश्च गर्ह्यं कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टव
ह्निं समदंति गृध्राः १६ अन्ये तु येत्वेह नृशंसमज्ञा यथुद्यतास्त्राः प्रहरंति मह्यं तैर्भूतनाथान्सगणानिशातत्रिशूल
निर्भिन्नगलैर्यजामि १७ अथो हरे मेकुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदात्र तत्रानृणो भूतबलिं विधाय म
नस्विनां पादरजः प्रपत्स्ये १८

बलिर्देवा १६ अन्ये ये अज्ञा हन्तारत्वां नृशंसमनुमहामनुद्यतास्त्राः संतोयदि प्रहरंति तैर्भूतनाथान् यक्षादिकपयन्नतैः निशो
तैतीक्ष्णीकृतयस्त्रविमविश्वलं तेन निर्भिन्नो गलायेषां तैः १७ अथो अथवा हरे सोऽहं इन्द्र हिनवानेव मम शिरो हर्ता हरिष्यति
तत्र तथा सति अनृणो विमुक्त कर्मबंधः सन्तेसोवविदे देनविधायवमनस्विनां पादरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि ...

Indira Gandhi National
Centre for the Arts

भा०ष०स० जीवितादपि मृत्युरेव मम श्रेयान् इत्याशयेनाह सुरेन्द्रेति न हिनोषि न क्षिपसि यदेव विफलो याच्या स्यादिति संशयं मा कार्षीः कृ
३९ पणादर्थः प्रयोजनं यस्याः सा याच्ञा याचना यथा निःफला तथा न स्यात् १९ अमोघत्वे हेतुमाह वदन् तं प्रोत्साहयति नन्विति तेजितस्तीक्ष्णी
कृतः शत्रुं मां जहि विष्णुना यन्त्रितः प्रेरितः २० स्वनिधनमपि उपादेयत्वादिना प्रियतमं संप्रेक्ष्य प्राह अहमिति संकर्षणो भगवान् तस्य
पादारविन्दे मनो ध्यायम् अहं गतिं यास्यामि तव वज्रस्य रंहसा लुलितश्छिन्नो ग्राम्यपाशो विषयरूपो

सुरेन्द्र कस्मान्न हिनोषि वज्रं पुरःस्थिते वैरिणि मय्यमोघं मा संशयिष्ठा न गदेव वज्रं स्यान्निःफलं कृपणार्थेव याच्ञा
या १९ नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचस्तपसा च तेजितः तेनैव शत्रुं जहि विष्णुयन्त्रितो यतो हरिर्विजयः
श्रीर्गुणास्ततः २० अहं समाधाय मनो यथाह नः संकर्षणस्तच्चरणारविन्दे त्वद्वज्ररंहो लुलितग्राम्यपाशो गतिं मु
नेर्याम्यपविद्धलोकः २१ पुंसां किलैकान्तधियां स्वकानां याः संपदो दिवि भूमौ रसायां न राति यद्द्वेष उद्वेग आ
धिर्मदः कलिर्व्यसनं संप्रयासः २२ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ततोऽनुमेयो भगव
त्प्रसादो यो दुर्लभोऽकिंचनगोचरोऽन्यैः २३

गलच्छिन्नो यस्य अपविद्धलोकः मत्यक्तदेहः २१ तर्हि भगवान् संकर्षणः स्वभक्ताय मह्यमेव स्वर्गादिसंपदो दास्यतीत्यपि मा सं
शयिष्ठा इत्याह पुंसामिति स्वर्गे भूमौ रसातले च याः संपदस्ताः किल न निश्चितं न राति न ददाति तत्र हेतुः यत् यासु द्वेषादयो
भवंति २२ तर्हि स्वजनस्य किं विधत्ते तत्राह त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते ततश्च आ
यासोपरमात् अनुमेयः त्वत्सदृशैर्दीनैः अतः सम्यक् भगवत्प्रसादप्राप्त्या भवत्संपदोऽविघ्नीति भावः २३ छे

त्वमिंद्राय स्वाभिप्रायं निवेद्य भगवंतं प्रार्थयते अहमिति तव पादावेव एकं मूलं आश्रयो येषां ते श्रीरामानामनुदास भूयो
पि न विना भविष्यामि निवेद्यं असुपतेः प्राणनाथस्य तव गुणान् मम मनः स्मरतु वाग्भिः तानेव कीर्त्तयतु कायस्तवैव कर्म्म क
रोतु २४ तत्किं दास्येन तुभ्यं महाफलमित्याशयेनाह नाकपृष्ठं ध्रुवपदं ब्रह्मलोकादिकं वा हे समंजस निर्दिलसोऽपि नैव ला

अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म्म करोतु का
यः २४ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरहय्य कांक्षे २५
अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्त्ताः प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविंदाक्ष दिदृक्षते त्वां
२६ ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्म्मभिः त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न
नाथ भूयात् २७

वा विरहय्य पृथक्कृत्य न कांक्षे नेच्छामि २५ तर्हि किमिच्छसि इति तदाह अजातपक्षाः खगाः स्वकादिभिः पीडिताः यथा मातरं यथा
च दामबद्धाः बालवत्साः स्तन्यं यथा च व्युषितं दूरदेशं गतं प्रियं कामेन विषण्णा प्रिया तथा मे मनस्तापत्रयपीडितं कर्म्मभि
र्बद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः २६ उत्तमश्लोकजनेषु भक्तेष्वेव सख्यं भूयात् त्वन्मायया देहादि
ष्वासक्तचित्तस्य भूयोऽपि तेष्वासक्तिर्न भूयात् २७

Indira Gandhi National Centre for the Arts

शा०प०म० दारुणोतिविक्रमेण स्वयमुत्साहितेन च महेन्द्रेण महायुद्धे हतस्य वृत्रस्य दर्शितं २० महाहवयुद्धं स्मृत्वा विस्मितं अन्यबलयोरके युगान्ता
४० ग्निवत्कठोरा जिह्वाग्निस्वासयत अविधान्नामयित्वा २ तस्मिन्नापतति भानबलविज्ञात परिश्रमनष्टस्य च कोपयुतोऽस्मि
नहनदुःपेक्ष्यं ज्ञातं पर्वाणि यस्तेन च रणराजो यामनुकिं तस्मात्रोदहस्तदाकारं ३ स्तोकपोलकांतेऽभूमहंसमेणवतेच ५५ स्तुनश्च

एवं जिह्मासुरं न पदे रम्भाजौ हसुवरं विजयानमानः शूलं चरद्यानपतत्सुरेन्द्रं यथामहाउरूपकेह
नोस्तु १ ततो युगान्ताग्निकमोरजिक मा विधश्रूलेन रमाऽसुरेन्द्रः ज्ञिप्तामहें दायविनद्य वीरो हतोसिपापेतिरुषाज
गाद २ स चापतन्नद्विवल उग्रहोल्कवज्रिरोदशु पेक्ष्यमजातविक्रमः वज्रेण वज्री ज्ञातपर्वणाऽछिनत्भुजं च तस्यो
रगराजतोग ३ छिन्नैकबाहुः परिघेण हत्वः संरब्धमासाद्य गृहीतवज्रं हत्वोत्तताडेन्द्र मथाऽपरेनं वज्रेण हस्तान्मप
तन्नघोरः ४ हतस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसंघाः अस्तुवंस्त सुरुहतं संकटं निरीक्ष्य हादेति
विमुक्तपूर्वं ५ इंद्रोन बलत्रेण हृदे विलज्जित श्रुतं स्वहस्तादरिसंनिधौ पुनः तमाददृत्रो हस्मात्तवज्रो जहि स्व
शत्रुं न विषादकालः ६ युयुत्सर्सां कुत्र विदात नापि जयः सदैकत्र न वै पराजयः विनैकमुत्सानिलय स्थितीश्वरं सर्व
ज्ञमाद्यं पुरुषं सनातनं ७ लोकाः सपाला यस्येमे स्वासं तिविवशा वशे द्विजा इव शिवा बद्धाः स कालः इह कारणं ८ शा०प:
४०

तस्मादृत्रोसहरे इंद्र ६ सदा जयो नैव किंतु कुत्रचित् नैकदा कुत्रचित् पियुयुत्सतां सदा जयो नैव किं त्वेकत्रैव कदाचिद्वे सैन्ये
र्षिः परोद्दत्रात्मायेषां तेपराधीना मनानामिति वा अपमनादि सनातनं वि सं ७ पराधीनतामेवाह लोका इति सप्तभिः य
स्यवशे स्थिताः स्वयं विचरणः संतः श्वसंति चेष्टंते द्विजापक्षिणः शिवाजालेन कालः कलयतीति भगवान् हरजयादौ कारणं ८

वोजआदिरूपं कालं तं हेतु मज्ञाय अविज्ञाय जडं सेन माल्लानं देहे तु मन्यते ९ १० ननु स्वारं नकथमान्पुरुषादितं ज्ञाणी नियुक्तं तत्रा
ह पुरुष इति मलं कंमहन्तत्त्वं आत्मा अहंकारः ११ ननु स्वकर्म्मे वाराजीवएव स्त्र्यादिहेतुरिति मीमांसकाम्मन्यंते तत्राह एवमविद्वान्
अनीशमेवात्मानमीश्वरं स्वतः त्वमस्यते ननु क्रियादयंसु ष्टारे नहत्वपंने आधाद्यस्तेष्ठ तारस्तत्राह भूतैरिति स्वयं इश्वरः १२ न
तु त्वया पराजितस्य मम जयादिकेन चताप्तिः किमिति मां वलात युद्धे प्रवर्त्तयसि इत्याह आयुरिति तत्काले अपदिकालेपि

ओजः सहोबलं प्राणं मृत्युममृतं मेवच तमज्ञाय जनोहेतुमात्मानं मन्यतेजडं ९ यथा दारुमयी नारी यथा यंत्रम
यो मृगः एवं भूतानि मघवन् ईशतंत्राणि विद्धि भो १० पुरुषः प्रकृतिर्व्यक्तं मात्मानं भूतेन्द्रियाशयाः शक्नुवंत्यस्य स
र्गादौ न विना यदनुग्रहात् ११ अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरं भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयं १२
आयुः श्रीकीर्तिरैश्वर्यमाशिषः पुरुषस्य वा भवंत्येव हि तत्काले यथानिच्छोर्विपर्ययाः १३ तस्मादकीर्तियशसो
र्जयापजययोरपि समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा १४ सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः
तत्र साक्षिणमात्मानं यो वेद स न बध्यते १५ यस्या मां निर्जितं शत्रुः कृत्तशस्त्रभुजं मृधे घटमानं यथाशक्ति तव प्राण
जिहीर्षया १६ प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः अत्र न ज्ञायते मुष्य जयो मुष्य पराजयः १७

र्ययोः अकीर्तिरादयः १३ यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्यात् हर्षविवादहीनो भवेत् १४ समदृष्टावुपायमाह सत्व
मिति हर्षादिभिर्न बध्यते १५ हर्षविषाद निष्टस्यैव वाङ्मेव गुरुरित्याह पश्येति हक्मायुधं भुजश्चयस्य १६ अनियतत्वं
द्यूतरूपकेणोपसंहरति १६ प्राणग्लहः पालो यस्मिन् इषवएवाक्षः यस्मिन् वाहनान्येवासनानि तत्स्थानानि यस्मिन्
सन्तानिफलकाय स्मिन् १७

Indira Gandhi National
Centre for the Arts

भा०१०स० गतालीकंनिःकपटं १८ भक्तः सर्वात्मनात्मानं १९ २० २१ तस्यतवखातकोदकैः गर्त्तादिजलोपमैः स्वर्गादिभिः किं २२ यु
४१ धांसंग्रामाणांपतीसुखौ २३ मारिषश्रेष्ठराजन् २४ २५ उत्कृत्तंमूलंययोस्ताभ्यांरक्तंस्रवतीतितथा गोत्रः पर्वतः २६

इंद्रोवृत्रवचःश्रुत्वा गतालीकमपूजयत् गृहीतवज्रःप्रहसंस्तमाहगतविस्मयः १८ अहोदानवसि
द्धोसि यस्यतेमतिरीदृशी भक्तःसर्वात्मनात्मानं सुहृदंजगदीश्वरं १९ भवानतार्षीन्मायांवै वैष्णवींजनमोहिनीं यद्विहाया
सुरंभावं महापुरुषतांगतः २० खल्विदंमहदाश्चर्यं यद्रजःप्रकृतेस्तव वासुदेवेभगवति सत्वात्मनिदृढामतिः २१ यस्य
भक्तिर्भगवति हरौनिःश्रेयसेश्वरे विक्रीडतोऽमृतांभोधौ किंक्षुद्रैःखातकोदकैः २२ इतिब्रुवाणा
वन्योन्यं धर्मजिज्ञासयानृप युयुधातेमहावीर्यौ विंद्रवृत्रौयुधांपती २३ आविध्यपरिघंवृत्रः कार्ष्णायसमरिंदमः इंद्रा
यप्राहिणोद्घोरं वामहस्तेनमारिष २४ सतुवृत्रस्यपरिघं वृत्रःकार्ष्णायसमरिंदमः इंद्रायप्राहिणोच्छिच्छेदयुगपद्देवो
वज्रेणशतपर्वणा २५ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौरक्तस्रवोऽसुरः छिन्नपक्षोयथागोत्रः खाद्भ्रष्टोवज्रिणाहतः
२६ कृत्वाधरांहनुंभूमौ दैत्योदिव्युत्तरांहनुं नभोगंभीरवक्त्रेण लेलिहोल्बणजिह्वया २७ दंष्ट्राभिःकालकल्पाभिर्ग्रस
न्निवजगत्त्रयं अतिमात्रमहाकाय आक्षिपंस्तरसागिरीन् २८ गिरिराट्पादचारीव पद्भ्यांनिर्जरयन्महीं जग्राससमा
साद्यवज्रिणंसहवाहनं २९ महाप्राणोमहावीर्यो महासर्पइवद्विपं वृत्रग्रस्तंतमालोक्य सप्रजापतयःसुराः ३० राम:
हाकष्टमितिनिर्विण्णाश्चुक्रुशुःसमहर्षयः निगीर्णोऽप्यसुरेंद्रेण नममारोदरंगतः ३१ ४१

कृताधरामित्यादेर्ज्ञेयासेतितृतीयेनान्वयः नभोवद्गंभीरेणवक्त्रेण लेलिहःसर्पःतद्वदुल्बणयाजिह्वया २७ कालक
ल्पाभिःग्रसन्जयन्चूर्णयन् २९ महाप्राणोमहाबलः महावीर्योमहाप्रभावः ३० ३१ छे

महापुरुषेणकवचरूपेणश्रीनारायणेनसंनद्धोदंशितः योगबलेनमायाबलेनच ३२ बलभित्इंद्रः उच्चकर्त्तचिच्छेद ३३
तस्यकंधरंकंधरंआशुवेगः अतिवेगवान् ज्योतिषांसूर्यादीनांअयनेदक्षिणोत्तरगतिरूपेसंवत्सरेयोऽहर्गणःषष्ट्युत्तरश
तत्रयात्मकः तावतासर्गणेनवर्षदसेवत्रहत्यायोग्येकाले न्यपातयत् यद्वा स्वार्थेतद्धितः वृत्रहत्यायांवृत्रहननार्थंपरिव
र्तमानइत्यर्थः ३४ वार्त्रघ्नलिंगैर्मंत्रैःइंद्रवीर्यप्रकाशकैः वार्त्रहत्यायाऽवसेष्टतमाषाढ्यायचेत्याद्यैस्तमिंद्रमभिष्टुवानाः अभिष्टुवं

महापुरुषसंनद्धो योगमायाबलेनच ३२ भित्वावज्रेणतत्कुक्षिं निःष्क्रम्यबलभिद्विभुः उच्चकर्त्तशिरःशत्रो
र्गिरिशृंगमिवौजसा ३३ वज्रस्तुतत्कंधरमाशुवेगः कृंतन्समंतात्परिवर्त्तमानः न्यपातयत्तावदहर्गणेनयोज्यो
तिषामयनेवार्त्रहत्ये ३४ तदाचखेदुंदुभयोविनेदुर्गंधर्वसिद्धाःसमहर्षिसंघाः वार्त्रघ्नलिंगैस्तमभिष्टुवानाम
न्त्रैर्मुदाकुसुमैरभ्यवर्षन् ३५ वृत्रस्यदेहान्निःक्रांतमात्मज्योतिररिंदम पश्यतांसर्वलोकानामलोकंसमपद्यत
३६ वृत्रेहतेत्रयो
लोका विनाशक्रेणभूरिद सपालाह्यभवन्सद्यो विज्वरानिर्वृतेंद्रियाः १ देवर्षिपितृभूतानि दैत्यदेवानुगाः
स्वयं प्रतिजग्मुःस्वधिष्ण्यानि ब्रह्मेंद्राद्यास्ततः २

तः ३५ अलोकंलोकातीतंभगवंतं ३६ त्वषोदरेवृत्रस्यब्रह्महत्यामह
जयात् चिरंनष्टोऽवितःशक्रोविष्णुचेतिविस्मयते १ अनिर्वृतंशक्रमदृष्ट्वा स्वयमेवप्रतिजग्मुः २ वात्रहत्याय इंद्रसत्तर्वमप
रपतिश्रुति वयमेगायत्रीविष्णो इंद्रोवृत्रहादेवता वार्त्रहत्याय दृष्टोयेनत्रावसावलेनहत्येतेन वार्त्रहत्यायशावरोष्टत्वाषाढ्या
... आवर्त्तयामसि आवर्त्तयामःसहता २

भा०ष०अ० इंद्रस्य हरेरिंद्रस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह वृत्रविक्रमेत्यादिना वार्थयन्प्रार्थयंत वृत्रवधात् ब्राह्मणवधाद्भीतः सन् ध
४२ एतः पापं विभज्य किंचित्तत्त्वगृहीतं पाप्मशोधयामि ५ वृषाकपिमिंद्रं १० तयादेवादिभिः कामितयास्मिन्नवधारणे इंद्रत्वं तो पम

इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि सत्तमुने येनासन्सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ३
वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः तद्वधायार्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात् ४ इंद्र
अलस्तु मे नो विश्वरूपवधोद्भवं विक्रममनुगृह्णाति ईश्वरस्तां कमाज्ञर्महे ५ ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ६ हयमेधेन पुरुषं परमात्मानमीश्वरं इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ७ ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान् श्वादः पुल्कसको वापि शुध्येरन्यस्य कीर्तनात् ८ तमश्वमेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ९ श्रीशुक उ० एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिं १० तयेंद्रः स्मासहत्तापं निर्वृतिर्नामुमाविशत् ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः ११ तां ददर्शानुधावंतीं चांडालीमिव रूपिणीं जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटां १२ विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीं मीनगंधासुगंधेन कुर्वतीं मार्गदूषणं १३ नभोगतो दिशः सर्वाः सहस्राक्षो विशांपते प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसं १४ राम:
४२

सहत्तापः अमुमिंद्रं निर्वृतिर्नाविशत् ननु धैर्यादिगुणयुक्तस्य कुतो निर्वृतिः तत्राह ह्रीमंतं वाच्यतां निंदितां ११ यक्ष्मग्र स्तोऽस्य रोगवान् १२ मीनस्येव गंधो यस्य स मीनगंधिः स चासावसुगंधश्च वासुस्तस्य गंधेन १३ प्रागुदीचीं दिशं गतः सन् तूर्णं मानसं सरः १४

शो इंद्रः सहस्रं वर्षाणि पुष्करनालतंतुष्ववसत् कथं तत्र नलक्षितो योगेन सः यत्पस्मात् इह लोके सत् अग्निस्तस्य स्वयं अनेश्वरस्य हव्यविसर्गं तेषु जले प्रवेशासंभवात् लब्धयोगस्त्यर्थः पाठांतरे नलक्ष्मी यज्ञभागो येन सः १५ त्रिणाकं नाकं तृतीयं स्वर्गं तेषु यस्मिन्निति त्रिलोकः भुवर्लोकः तृतीयं नाकं स्वर्गं तेषु मनुष्यस्य कुतः स्वगराज्यं कस्मात् विद्यादिभिरनुशासनं स्वर्गपालनसामर्थ्यं यस्य सतर्हितस्मिन्सति कथमिंद्रस्य पुनः स्वर्गप्राप्तिस्तत्राहाम नहुषः संपदैश्वर्यमोहो मदस्तेनांधा बुद्धिर्यस्य सः इंद्रपत्न्याः आ तिरस्कारेण सर्पयोनिं नीतः उपायेन प्रापितः एवं ह्यास्यायते नहुषः किल करचिदिंद्राणीम् वाचं इंद्रस्याव दर्शनं तस्मान्न

सभ्यावसत्पुष्करनालतंतून् अलब्धभोगो यदिहाग्निदूतः वर्षाणि साहस्रमलक्षितोंऽतः संचिंतयन्ब्रह्मवधाद्विमोक्षं १५ तावत्त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः स संपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चां गतिमिंद्रपत्न्या १६ ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः पापस्तु दिग्देवतयाहतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या १७

जेति तयाप्यावेदितवृत्तांतो नहुषः तत्रागत्य बाधितो ब्राह्मणा वाहयित्वा शिबिकां गमनं त्वरयामीति सर्प सर्पेति तत्तो ब्राह्मणा पात लित इति तथाच तयोक्तो नहुषोऽगस्त्यादीन् शिबिकां वाहयामास अगस्त्यं ह्रस्वं सर्प सर्पेति वदन् पादेन स्पृष्टवान् तेन कुपितेन सर्पो भवेति शप्तो महाघोरः अजगरः अभूदिति ततः इंद्रः स्वर्गं गतः कथं ततः ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः सन् ऋतंभरः सत्यपालके हरिः तस्य ध्यानेन निवारितमघं येन पापः अपि तु पापो ब्रह्मवधस्तमिंद्रं नाभ्यभूत तस्माज्जित्वंनाकरोत् कुतः दिग्देवतया पूर्वस्यां दिशि स्थितया अपि रुद्रेण अवितं रक्षितं सतो ॥१७॥

Indira Gandhi National Centre for the Arts

भा०ष०स०
४३

पुरुषस्य हरेराधनं यस्मिंस्तेन १८ सर्वदेवमय आत्मा मूर्तिर्यस्य तस्मिन् वेदमयात्मनीति वा पाठः ब्रह्मवादिभिर्वितते अनुष्ठिते
अश्वमेधे महेंद्रेण इज्यमाने पुरुषे सति १९ तेनैव पुरुषेणैव शून्याय नीतः नाशित इत्यर्थः २० अधिकृताय ज्ञायेनतां २१
पापादि विश्वातुल्ममख्यानं स्तौति इदमिति प्रक्षालनं तीर्थपदस्यानुकीर्तनं यस्मिन् भक्तजनानामनुवर्णनं

तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह १८ अथेज्यमाने पुरुषे सर्वदेवमयात्मनि
अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः १९ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप नीतस्तेनैव शून्याय नीहार
इव भानुना २० स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो मह
नास विधूतपापः २१ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनं भक्त्युच्छ्रयं भक्तजनानुवर्णनं
महेंद्रमोक्षं विजयं मरुत्वतः २२ पठेयुराख्यानमिदं सदा बुधाः शृण्वंत्यथो पर्वणि पर्वणींद्रियं धन्यं यशस्यं निखिला
घमोचनं रिपुंजयं स्वस्त्ययनं तथायुषं २३

राम:
४३

यस्मिन् महेंद्रस्य मोक्षो यस्मिन् मरुत्वतो विजयो यस्मिन् २२ इंद्रियं तस्मात् पुष्टिकरं इंद्रसंबंधीति वा आयुष्यमायु
ष्यं २३ वृत्रस्य तामसस्यापि भक्तिः परीक्षिता हेतुं प्राह चतुर्दशे स्नानज
चरितोक्तिभिः १ चतुर्दशे तु संसार... पुत्रेष्टौ मुतेष्टे ते चित्रकेतुरतिस्नेहादतिशोको निरूप्यते २

रजश्च तमश्च स्वभावो यस्य १ २ अनेकेषु जन्मसु तत्त्वं प्रपंचयति त्रिभिः पार्थिवैरजोभिः परमाणुभिः समाः संख्याताः अनंता इत्यर्थः जंत
वो जीवाः तेषां मध्ये केचन कतिपये श्रेयो धर्ममीहंते कुर्वंति ३ मुच्येत गृहादिसंगाद् मुच्यते सिध्यति तत्त्वं जानाति ४ ५ ६ भूये
ष्यान् कुतूहलं प्रभो इत्यन्वयः ७ ८ पौरुषेणेति यथायथावद्रूपुः ९ १० भार्यासहस्राणां दश सहस्राणि कोटिरित्यर्थः सांतानि

रजस्तमःस्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः नारायणे भगवति कथमासीद् दृढा मतिः १ देवानां सत्त्वानां शु
द्धीणां चामलात्मनां भक्तिर्मुकुंदचरणे न प्रायेणोपजायते २ रजोभिः समसंख्याताः पार्थिवैरिह जंतवः तेषां ये केचने
हंते श्रेयो वै मनुजादयः ३ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ४ मुक्तानामपि
सिद्धानां नारायणपरायणः सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ५ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः इत्थं दृ
ढमतिः कृष्ण आसीत्संग्राम उल्बणे ६ अत्र नः संशयो भूयान् श्रोतुं कौतूहलं प्रभो यः पौरुषेण समरे सहस्राक्षमतोषय
त् ७ [illegible] परीक्षितोऽथ संप्रश्नं भगवान् बादरायणिः निशम्य श्रद्दधानस्य प्रतिनंद्य वचोऽब्रवीत् ८ [illegible]
[illegible] शृणुष्वावहितो राजन् इतिहासमिमं यथा श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ९ आसीद्राजा सार्वभौमः
शूरसेनेषु वै नृप चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ्मही तस्य भार्यासहस्राणां सहस्राणि दशाभवन् सांतानिक
श्चापि नृपो न लेभे तासु संततिं १० रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः संपन्नस्य गुणैः सर्वैश्चिंता वंध्यापते
रभूत् ११

कः स्वयं संतानार्होऽपि पुत्रोत्पादनसमर्थोऽपि तासु संततिं न लेभे सर्वासां वंध्या एव दैववैगुण्येन मिलिता इति भावः १ तदेवाह वंध्या
पतेरिति १२

Indira Gandhi National
Centre for the Arts

उपासीदत् तस्मात्सर्वपांउ पांचिवेत्राण्यमका हितःसंयतः १५ १६ अपि किं अनामयमारोग्यं स्वस्ति कुशलं प्रकृतयः स्वाधीनमेव हि राज्य
वा०यो०स० निमदर्शितमाह यथामदादयाभिः सप्तभिः प्रकृतिभिः गुणान् जीवोपि संगुणोत्तरवति न तु य मातिरिकेण पादिति इति तथा राजा
४४ पिति इति तथा रापि सप्तभिः स्वाम्य मात्योजनपददुर्गद्रविणसंचयाः दंडो मित्रं चतस्रैताः सप्तप्रकृतयोमता इत्युक्तसज्जातिभि
तिस्तथा सप्तभिः स्वाम्य लक्षणासिर्निसिंगुणः सन् १७ आत्मानं प्रकृतिषु अहासाक्षान्निधाय तदनुवर्तिनं कृत्वाश्रेयो राज्य

त्वतस्य संपदः सर्वास्मद्दिशो वास लोचनाः सार्वभौमस्य त्रस्थेयम प्रवर्प्यातिरेतव १३ तस्यैकदानुजवनमंगिरात्वा
चषिः लोकानुनुचरलेतानुपागच्छद्यदृच्छया १४ तं प्रजयित्वा विविधैवस्त्वस्तुस्यानाईणादिभिः कृत्वातिथ्यमुपासी
दनुस्वासीनं समाहितः १५ महर्षिस्तमुपासीनं प्रश्रयावनतं स्थितो प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् १६
अपि ते नामयस्वस्ति प्रकृतीनां तथात्मनः यथाप्रकृतिभिर्गुप्तः गुणान्नाजाच सप्तभिः १७
आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् राज्ञा तथा प्रकृतयो नरदेवाहिताधयः १८ अपि दाराः प्रजामा
त्या भृत्याः श्रेण्योपमंत्रिणः पौरा जानपदा भूया आत्मजा वस्त्रवर्त्तिनः १९ छै

राम:
४४

सुखं प्राप्नुयादित्यर्थः स्वामी गुरुस्वयं वा मंत्र सहायो मित्रं कर्म्मसहायोऽमात्य इति भेदः प्रकृतीनां च सुखं राजाधीनमेवेत्याह
हे नरदेव तथा प्रकृतयोऽपि राज्ञा आहिताधयः निहितनिक्षेपाः धनैः सन्तृप्ताः भवंति पाठांतरे आसमंततो हिताधयो निरस्त
मनोदुःखा भवंतीत्यर्थः १८ अमात्यास्त्र श्रेण्यश्च समयेविशेषेण संघ गोवर्द्धमाना वणिक्प्रभृतयपौराः पुरवासिनः जान
पदाः तत्सदेशाधिकारिणः १९

तवमनः स्ववशे वा न वेत्यपृच्छत् इच्छति यस्मात्मामनः अनुवशाः अनुवर्तीअधीनः स्यात् तस्यकृत्सागाइमे सर्वे भवंति किंच लो
काश्चतस्य बलिं यच्छंति २० आत्मानवान् आत्मानो न वतीयते न तुष्यति तत्किं परतो वा स्वतो वा अलब्धकामं त्वां लक्षये २१

यस्यात्मानुवशश्चेत्स्यात् सर्वे मद्वशगा इमे लोकाः सपालाः यच्छंति सर्वे बलिमतंद्रिताः २० आत्मनः प्रीयते नात्मा परतः
स्वतएव च लक्षये लब्धकामं त्वां चिंतया शबलं मुखं २१ एवं विकल्पितो राजन् विदुषा मुनिनापितः प्रश्रयावनतो भ्या
ह प्रजाकामस्ततो मुनिं २२ भगवन् किं न विदितं तपोज्ञानसमाधिभिः योगिनां ध्वस्तपापानां बहिरंतः
शरीरिषु २३ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितं भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया २४ लोकपालैरपि
प्रार्थ्याः साम्राज्यैश्वर्यसंपदः न नंदयंत्यप्रजं मां क्षुत्तृट्काममिवापरे २५ ततः पाहि महाभाग पूर्वैः सह गतं तमः यथा
तरेम दुस्तारं प्रजया तद्विधेहि नः २६ इत्यर्थितः स भगवान् त्वाष्ट्रं चरुं निरवपत्त्वाष्ट्रं त्वष्टा
रमयजत् द्विजः २७ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्द्विजः २८ अ
थाह नृपतिं राजन् भवितैकस्तवात्मजः हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ २९

ङ्षा सर्वज्ञेनापि २२ अलब्धकामत्वं कथयन् पुत्रं याचते भगवन्निति चतुर्भिः २३ २४ अप्रजमपुत्रं मां क्षुत्तृडन्नपान कामं
अपरे स्रक्चंदनादयो यथा सुखयंति २५ पूर्वैः पित्रादिभिः सह गतं प्राप्तं तमः नरकं प्रजया यथा पातरेम तथा विधेहि २६ २७
यज्ञोच्छिष्टं यज्ञशेषं २८ जन्मना हर्षं मरणेन च शोकं प्रददातीत्यर्थः इत्येवमुक्त्वा ययौ २९ ३० ॥ छै

भा०६०अ० स्वरसेनानाम्नीत्वष्टुस्तेजसा वीर्येण योगर्ह्रः सवट्ठेदे ३१ ३२ वातकर्म्मणः ३३ अर्बुदंदशकोटयः वेदेतुकोटिरेवार्बुदंतियुक्तं
४५ वचयुक्तं तुचार्बुदंचेतिषट्तानं तरनिर्द्देशात् ३४ धनंधनकरं आयुष्यमायुःकरं ३५ ३६ मोहस्यसमुद्भवो यस्मिन् प्रजाकामस्य

सापितत्प्राशनादेव चित्रकेतोरधारयत् गर्भंकृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजं ३० तस्या अनुदिनंगर्भः शुक्लपक्ष इवोडुपः ववृधे शूरसेनेशतेजसा शनकैर्नृप ३१ अथकाल उपावृत्ते कुमारः समजायत जनयन् शूरसेनानां शृण्वतां परमां मुदं ३२ हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः वाचयित्वाशिषो विप्रैः कारयामासजातकं ३३ तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ग्रामान्हयान्गजान्प्रादाद्धेनूनामर्बुदानिषट् ३४ ववर्षकामानन्येषां पर्जन्य इवदेहिनां धन्यं यशस्यमायुष्यं कुमारस्य महामनाः ३५ कृच्छ्रलब्धेऽथराजर्षेस्तनयेऽनुदिनंपितुः यथानिःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्धत ३६ मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ३७ चित्रकेतोरतिप्रीतिर्यथादारे प्रजावति न तथान्येषु संजज्ञे बालंलालयतोऽन्वहं ३८ ताःपर्यतप्यन्नात्मानं गर्हयंत्योऽभ्यसूयया आनपत्येन दुःखेन राज्ञोऽनादरेण च ३९ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमतां सुप्रजाभिः सपत्नीभि र्दासीमिवतिरस्कृतां ४० दासीनां को नु संतापः स्वामिनः परिचर्यया अभीक्ष्णंलब्धमानानां दास्यादासीवदुर्भगाः ४१ एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा राज्ञोऽसंमतवृत्तीनां विद्वेषो बलवानभूत् ४२ विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः गरंददुःकुमाराय दुर्मर्षा नृपतिंप्रति ४३ भाग: ४५

योऽजरस्तापः ३७ दारइत्येकवचनमार्षं ३८ आनपत्येन अपुत्रत्वनिमित्तेन ३९ तगृहेसंमतां नबहुमतां यद्वागृहिणीत्वेन गृहकार्येति संमतामित्यर्थः ४० दास्यादासी यथा तथा च यं दुर्भगाः ४१ नसंमता न दृष्टा वृत्तीर्जीवनं यासां ४२ विद्वेषेणनष्टामतिर्यासां ताः गरं विषं दुर्मर्षाः असहमानाः ४३

---

धात्रीं स्तन्यदायिनीं ४५ उत्तारके ऊर्ध्वनीते कनीनिके ययोस्ते लोचने यस्य तं ४६ ४७ विभ्रष्टाः शिरोरुहाः अंबरे च यस्याः सा ४८ ताश्च सपत्न्यो व्यलीकं अलक्षितः अंतकः मृत्युहेतुर्यस्य तं ४९ अनुगताः प्रकृतयोऽमात्यादयो यस्य सोऽनुप्रकृतिः ५० बाष्पकलाभिः अश्रु

कृतद्युतिरजानंती सपत्नीनामघंमहत् सुप्त एवेति संचिंत्य निरीक्ष्य व्यचरद्गृहे ४४ शयानं सुचिरंबालमुपधार्य मनीषिणी पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ४५ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनं ४५ प्राणेन्द्रियात्मभिस्त्यक्तं हतास्मीत्यपतद्भुवि ४६ तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नंत्याः कराभ्यामुर उच्चकैरपि प्रविश्यराज्ञी त्वरयात्मजांतिकं ददर्श बालं सहसा मृतं सुतं ४७ पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहांबरा ततो नृपांतःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनं ४८ आगत्य तुल्यव्यसनाः सुदुःखिताः स्ताश्च व्यलीकं रुरुदुः कृतागसः श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतन्स्खलन्पथि ४९ स्नेहानुबंधैधितया शुचा भृशं विमूर्छितोऽनुप्रकृतिर्द्विजैर्वृतः पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहांबरः ५० दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकंठो न शशाक भाषितुं पतिंनिरीक्ष्यो रुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिं ५१ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा स्तनद्वयं कुंकुमपंकमंडितं निषिंचती सांजनबाष्पबिंदुभिः ५२ विकीर्यकेशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरं ५३

बिंदुभिरुपरोधतः संघातत्वेन निरुद्धः कंठो यस्य उरुशुचार्पितं बहुशोकेन व्याप्तं एकमेव संततिरूपं ५१ ५२ विगलंत्यः स्रजो येभ्यस्तान् केशान् ५३

Indira Gandhi National Centre for the Arts

भा०१०स०
४६

आत्मसृष्टेरप्रतिरूपं अननुरूपं चेष्टसे तदेवाहो परे वृद्धो जीवति अपरस्य बालस्य या मृतिस्तत् तदा हि वृद्धस्य सृष्टिसामर्थ्याभा
वे बाले च मृते सति तत्र वंशच्छित्तिः स्यादित्यर्थः सांप्रतं त्वत्सृष्टेर्विपरीतोऽस्मीति चेत्तत्राह विपर्ययः विपरीतोऽसि चेत् तर्हि विधाता
नासि ध्रुवः स्वतन्त्रत्वात् ध्रुवः नित्यः परः अत्युत्तमस्त्वं न भवसीत्यर्थः ५४ ननु जीवकर्मानुसारेण जन्मादि कुर्वतो मम कोऽपराध
स्तत्राह न हीति पुत्रे जीवत्येव पिता म्रियते पितरि जीवत्येव पुत्रो जायत इति क्रमो नास्ति कर्माधीनत्वादिति चेत् तर्ह्यात्मक

अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे परो नु जीवत्यपरस्य मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः प
रः ५४ न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते
तमिमं विवृश्चसि ५५ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं अञ्जस्तरेम भवता
प्रजदुस्तरं यत् ध्वान्तं न याह्यकरुणेन यमेन दूरे ५६ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयन्ति नृपनंद
संविहर्तुं सुप्तश्चिरं ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानां ५७ छे

राम:
४६

कर्मभिरेव तज्जन्मादि कमस्तु किं त्वया कृतं ननु मयेश्वरेण विना जडैः कर्मभिरिदं कथं सिध्येत् न वक्तुं नाम तथापि निज
कर्मणः वृद्धये तेत्यायः स्नेहपाशः कृतस्तमिमं स्वयमेव किं वृश्चसि छिनत्सि तस्मात् प्रादिक्रोशति न ह्येवं विधं कर्म दृष्ट्वा कश्चिदपि
पुत्रादिषु स्नेहं करिष्यतीति भावः ५५ अप्रजदुस्तरं अप्रजानां दुस्तरम् अकरुणेन यमेन ५६ अशनया क्षुधा ५७

---

न ह्यहं हे पुत्र नाहं प्रथमं त्वया सार्धं मागता सती तत् मुग्धस्मितं वक्त्रं ददर्श न दृष्टवत्यस्मि हतमङ्गला पितरोऽग्नेरपि तर्हि किं अपुन
रन्वयं पुनरन्वयं पुनरागमनं यथा यस्मान्न भवति तथा गतोऽसि ५८ ६१ ततः परं चित्रकेतोः शोकापनो
दनं कृतं तत्त्वोपदेशेन तत्र अङ्गिरो मुनिस्ता मृतकोपान्ते तत्रावतमी पितृचास्य वेष्टनो कतमः सृष्टौ प्रजा त्वत्ता यो अयं पुत्रः अथ

नाहं तनूज ददृशे हतमङ्गला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जं किं वा गतोऽस्यपुनरन्वयमन्यलोकं नीतोऽघृणेन न
शृणोमि कला गिरस्ते ५८ विलपंत्या मृतं पुत्रमिति चित्रविलापनैः चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह
५९ तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनं ६० एवं कश्मलमापन्नं नष्टसं
ज्ञमनायकं ज्ञात्वाङ्गिरा नाम मुनिराजगाम सनारदः ६१
ऊचतुर्मृतकोपान्ते पतितं मृतकोपमं शोकाभिभूतं राजानं सबुद्धिभिः १ कोऽयं स्यात्तव राजेंद्र भवान्
यमनुशोचति त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परं २ यथा प्रयांति संयांति स्रोतोवेगेन बालुकाः संयुज्यंते
विमुज्यंते तथा कालेन देहिनः ३ छे छे

वा स्यपि ते स्विति चेत् तत्राहुः परे इति ये पूर्वजन्मनि पित्रादिरूपेण संयुक्ता आसन् त एव मरणेन वियुक्ताः संतो वर्तमानजन्मनि क
दापि तस्यैव तस्य वा पुत्रादयो भवंतीति जन्मांतरे तस्यैव तस्य वा कलत्रादयः शत्रुमित्रादयो वा भवंति अतो नायं नियम इति
भाव २ तत्पोषणाभिप्रायं प्रकटयति यथेति स्रोतःप्रवाहस्य वेगेन यथा प्रयांति वियुज्यंते संयांति संयुज्यंते संयांति संयुज्य
न्ते तथा कालवेगेन देहिनो जीवा अपि ३

Indira Gandhi National
Centre for the Arts

भा०ष०स० तथाप्येतावंतं कालं मम पुत्रो नाभूत् वार्द्धके जातो मृतश्चेति दुःखमिति चेत्तत्राह तु । यथा धानासु बीजेषु धाना बीजांतराणि भवं
४७ ति कासुचित्कदाचिद्भवंति नोत्पद्यंते न पश्यंति च न तु भवंत्येवेति वा नियमः एवमेव भूतानि पुत्रादिरूपाणि भूतेषु अपि धाना
नां जन्यजनकत्वेपि यथा पितृपुत्रादिभावो नास्ति एवमत्रापीति नैष शोकः कार्य इत्यभिप्रायः ईशमाययेरितानामेव भवनं न
वस्तुतः ४ तस्य च सर्वसाधारणत्वान्न पुत्र एव शोचनीय इत्याह तु । वयं चेति । तुल्यकाला वर्तमानकालीनाः जंगमाः स्था
वरास्ते पश्चाच्च यथा न संति एवमधुनापि न संति भो राजन् आद्यंतयोरसत्वात्स्वप्नवदित्यर्थः ५ असत्वे कथं प्रती
तिः कथं वा ह यस्य जनकत्वाद्यभिमानस्तत्राह तु । भूतैरिति ईश्वरेण मायया सृष्टत्वात् प्रतीतिः निमित्तमात्रत्वेनैव

यथा धानासु वै धाना भवंति न भवंति च एवं भूतेषु भूतानि चोदितानीशमायया ४ वयं च त्वं च ये चेमे तुल्यकाला
श्चराचराः जन्ममृत्योर्यथा पश्चात्प्राङ्नैवमधुनापि भो ५ भूतैर्भूतानि भूतेशः सृजत्यवति हंति च आत्मसृष्टैर
स्वतंत्रैरनपेक्षोपि बालवत् ६ देहेन देहिनो राजन् देहाद्देहोभिजायते बीजादेव यथा बीजं देह्यर्थश्च शाश्वतः
७ देहदेहिविभागोयं अविवेककृतः पुरा जातिव्यक्तिविभागोयं यथा वस्तु विकल्पितः ८

च भूतानामयमस्मिन्नात्महत्याभावः ननु ईश्वरस्य सृष्ट्यादिभिः साध्यमिति चेत् अप्राप्तकामताबाधा नास्तीति चेत् कुतः राम:
प्रवृत्तिस्तत्राह अनपेक्षोपि बालवल्लीलया करोतीति ६ अयं च जन्मादिव्यवहारो देहानामेव न त्वात्मन इत्याह तु । देहि ४७
नः पुत्रस्य देहो मातुर्देहिनो देहाद्भिजायते यथा बीजादेव बीजं जायते देही तु शाश्वत एव अर्थो भूम्यादिर्यथा तद्वत् भूतश्च
देहप्रतियोगित्वात् देह्यपि नश्यतीत्यत आह तु । देहदेहिनोरयं परस्पर प्रतियोगिविभागः पुरा अनादिः अविवेककृतः अज्ञा
नकल्पितः जातिसामान्यव्यक्तिविशेषः तयोर्विभागो यथा वस्तुनि सत्यात्मके कल्पितः परस्परापेक्षसिद्धत्वेनानिरूपत्वात्तद्वत्
८

आधिम्लानं वक्त्रं ९ १० उन्मत्तस्यैव लिंगं येषां ते ११ १२ १३ १४ १५ मम प्रभू ज्ञानदौ विवेकपर्यायवितीर्णा यथार्थं वा

एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः विमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ९
कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसां अवधूतेन वेषेण गूढाविह समागतौ १० चरंति ह्यवनौ कामं ब्रा
ह्मणा भगवत्प्रियाः मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः ११ कुमारो नारदऋभुरंगिरा देवलोऽसितः अप
पांतरतमो व्यासो मार्कंडेयोथ गौतमः १२ वसिष्ठो भगवान्रामः कपिलो बादरायणिः दुर्वासा याज्ञवल्क्यश्च
जातुकर्ण्यस्तथारुणिः १३ रोमशश्च्यवनो दत्त आसुरिः सपतंजलिः ऋषिर्वेदशिरा बोध्यो मुनिः पंचशिखस्त
था १४ हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः एते परे च सिद्धेशाश्चरंति ज्ञानहेतवः तस्माद्युवां ग्राम्यपशो
र्मम मूढधियः प्रभू अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यतां १६ अहं ते पुत्रकामस्य पुत्रदोऽ
स्म्यंगिरा नृप एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः १७ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे अतदर्हमनुस्मृत्य
महापुरुषगोचरं १८ अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हसि १९ तदै
व ते परं ज्ञानं ददामि गृहमागतः ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददाम्यहं २० अधुना पुत्रिणां तापो भवतैवानु
भूयते एवं दारा गृहा रायो विविधैश्वर्यसंपदः २० शब्दादयश्च विषयाश्चला राज्यविभूतयः मही राज्यं बलं
कोशो भृत्यामात्यसुहृज्जनाः २२

सां ज्ञानदीपः प्रकाश्यतां १६ महापुरुषगोचरं भगवद्भक्तं १८ १९ २० एव अथ अन्यथा २१ चलाः अनित्याः किं च मही इति २२

Indira Gandhi National
Centre for the Arts

भा०ष०स० हे शूरसेन इमे सर्वेपि शोकादिप्रदाः किंच आगमापायित्वेन गंधर्वनगरतुल्याः गंधर्वनगरं हि अकस्मादेव कल्पितं दृश्यते अकस्माच्च तिरोभवति तथा
४८ नित्यसिद्धं तदेव यन्नित्यत्वेन शोकादिहेतुत्वं चागमापायित्वेन मिथ्यात्वमस्मात् स्वप्नश्च माया च मनोरथश्च यथा तद्वत् २३
मनोभवाः मनोमात्रविजृंभिताः २४ अत्र हेतुः अर्थो न तात्त्विक स्वरूपेणैव दृश्यमानाः तत्कुतः यस्मात्स्वरूपेणांतरेण दृश्यं
ते तात्त्विकत्वे हि स्वरूपांतरेण बाधो न स्यात् अतो मनोमात्रविजृंभितत्वेन स्वप्नादिवन्मिथ्याभूता इत्यर्थः ननु तेषु पापुण्यफल
भूताः इति मीमांसकाः प्राहुः तत्कुतो मनोभवत्वं तत्राह कर्मभिः कर्मवासनादिभिः अर्थानुध्यायतः पुंसो मनस एव विचित्राः क

सर्वेपि शूरसेनेमे शोकमोहभयार्तिदाः गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः २३ दृश्यमाना विनार्थेन न दृश्यंते
मनोभवाः कर्मभिर्ध्यायतो नाना कर्माणि मनसोऽभवन् २४ अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः देहिनो विवि
धक्लेशसंतापकृदुदाहृतः २५ तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश २६

र्मरूपेण परिणमंते एवं कर्मद्वैतस्य तस्य विधायकत्वमपि तदर्थः कर्माण्यपि मनोद्भवत्वात्तत्साध्यानामर्थानामपि मनोभवा एते मिथ्या एते टी०
मिथ्या २४ तदेवं ममतास्पदानां दुःखादिहेतुत्वमुक्तं तत्र देहसंबंधो मूलमित्याह अयं हीति हीत्यवधारणे अयं द्रव्यज्ञानक्रि ४९
यात्मकः अधिभूताधिदैवाध्यात्मरूपो देह एव देहिनः देहोऽहमिति मन्यमानस्य देहिनः देहोऽहमिति मन्यमानस्य देहिनो
जीवस्य विविधान् क्लेशान् संतापांश्च करोतीति तथा २५ स्वस्थेन मनसा आत्मनो गतिं तत्त्वं ध्रुवोयमर्थ इति विश्रंभं विश्वासं भ्रमा
यं वा त्यज ततश्च उपशममाविश आश्रय २६

अंगिरसोपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न संपद्यत इति तत्प्रसादाय मंत्रविद्यां नारद उपदिशति एतामिति उपनिषदं परं श्रे
योऽस्या मित्युपनिषत् मंत्र एवोपनिषत् प्रतीच्छ गृहाण द्रष्टा द्रक्ष्यसि विभाव्य २७ अतुलं च तदनधिकं च समानाधिकशून्यं
परं महिमानं प्रापुः उपैति प्राप्स्यसि २८ षोडशे तत्सुतो जीवचित्रकेतोः कीदृक्प्रत्यत्तंत्रप आ
दिदेश मंत्रविद्यां नारदः शेषवत्तोषणी १ आदौ तावत्पुत्रमुखेनैव पितृपुत्रादिसंबंधो मिथ्येति दर्शयितुं योगबलेन तमे

एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम यां धारयन् सप्तरात्राद्द्रष्टा संकर्षणं प्रभुं २७ यत्पादमूलमुपसृत्य न
रेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति २८
अथ देवऋषी राजन् संपरेतं नृपात्मजं
दर्शयित्वेति होवाच ज्ञातीनामनुशोचतां १ जीवात्मन् पश्य भद्रं ते मातरं पितरं च ते सुहृदो बांधवास्त
प्ताः शुचा त्वत्कृतया भृशं २ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः भुंक्ष्व भोगान् पितृप्रत्तान् अधितिष्ठ नृपास
नं ३ कस्मिन् जन्मन्यमी मह्यं पितरो मातरोऽभवन् कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ४
बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः सर्व एव हि सर्वेषां भवंति क्रमशो मिथः ५ छ

व ज्ञातीनां दर्शयित्वा जीवात्मानमित्युवाच १ २ शेषं सवशिष्टमायुरस्ते अत्यमृत्युनामृतत्वादित्यर्थः तदेकलेवरं प्रविश्यो
त्थितो जीवप्रवाच यद्यप्यंतरमलेपेत शारीरिण्यत्वेति शेषं ३ मयि मृते पुत्र दृष्ट्वा शोकश्चेत्तत्पुनर्दृष्ट्वा हर्षः किं न क्रियते इ
त्याशयेन संबंधस्यानियतत्वमाह बंधवो विवाहादिभिः संबंधिनः ज्ञातयः सपिंडाः अरयो घातकाः मित्राणि रक्षकाः मध्या
स्थास्तूभयत्र अविस्तिकाः विद्विषोऽप्यादितिर्मित्रे न द्विषंते उदासीनास्त्वप्रतिस्पर्धिन इति भेदः ५ छे

Indira Gandhi National
Centre for the Arts

भा०ष०स०
५९

कर्मभिस्तास्तत्प्राप्नोतीत्यत्र दृष्टान्तः यथा पण्यानि क्रयविक्रयाद्यैर्हेमादीनि कर्तृषु अवस्तुषु परिभ्रमन्ति एवं जीवोऽपि योनिषु जनकेषु ६
एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वे दृष्टान्तमाह द्वाभ्यां नित्यस्य जीवतोऽपि अर्थस्य पश्वादेः अनित्यः अनियतः क्रिया
दिना संबंध इत्यर्थः अतः तस्य पुत्रत्वस्यापि नास्ति प्रश्नः ७ एवं योनिगतः पित्रादि संबंधं प्राप्नोति स जीवो नित्यः देहजन्मादिनाश
स्य जन्माद्यभावात् अतएव नतो निरहंकृतः अस्य पुत्रत्वस्य निमानशून्यः यत्र पित्रादौ संबंधेऽपि यावदुपलभ्येत कर्मवशेन वर्त्ते
त तावदेव तस्य पित्रादेः स्वस्मिन् स्वत्वं न तु विक्रयादुत्तरकालमपि अथ चैव संबंधः मदुक्तं कलेवरे तथापि दीयोति तत्र तस्मिन् क
लेवरे ममेदमिति स्वत्वं निवृत्तं इति सदृष्टान्तमाह नित्यस्य चिरकालावस्थायिनः सुवर्णादेः यो निर्गतो देहं प्रविष्टः यत्र देहे तस्य

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु ६ नित्यस्यार्थस्य संबंधो ह्यनित्यो
दृश्यते नृषु यावद्यस्य हि संबंधो ममत्वं तावदेव हि ७ एवं योनिगतो जीवः स नित्यो निरहंकृतः यावद्यत्रोपलभ्येत ता
वत्स्वत्वं हि तस्य तत् ८ एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ९

जीवस्य तस्मिन् देहे स्वत्वं न तु परलोकस्य कालमपीत्यर्थः तोषं समाप्त ८ जीवस्य नित्यत्वं साधयति एष नित्यः तत्र हेतुः अव्य
यः अपक्षयशून्यः तत्कुतः सूक्ष्मः जन्मादिशून्यः तत्कुतः सर्वाश्रयः जन्मादिमतो देहादेराश्रयः न तु देहादिरूपः यतः रामः
स्वदृक् स्वप्रकाशः सर्वाश्रयत्वमुपपादयति आत्ममायया गुणैर्गुणैरात्मानमेव विश्वं विश्वात्मकं सृजति तदात्मानं ५९
स्वयमकुरुतेति श्रुतेः उपादानकारणत्वात् सर्वाश्रय इत्यर्थः जीवस्य वस्तुतो ब्रह्मत्वाद्ब्रह्मण एव च विश्वकर्तृत्वात् स्वमेव
रवेन सृष्टा जीवः सृजतीति वाचोयुक्तिः यद्वा स्वकर्मद्वारा निमित्तत्वेन स्रष्टृत्वं जीवस्य च सर्वस्य जीवाश्रयत्वात्
सर्वाश्रयत्वं चोक्तमिति द्रष्टव्यं ९

---

तदुक्तं सुहृदश्च इति सुहृदो बांधवा सत्र साक्षात्तिच तदप्याह न ह्यस्येति तत्र हेतुः एकः सुहृदादिभेदरहितः कुतः गुणदोषयोर्हि
तादृतयोः कर्तृणां पित्रादीनां याः सर्वा धियः विचित्रा बुद्धयः तासां द्रष्टा साक्षी १० यदुक्तं गुणदोषाभ्यां तत्राप्याह
नादत्त इति गुणं सुखं दोषं दुःखं च क्रियाफलं च राज्यादिकं उदासीनत्वे हेतुः परावरदृक् कारणस्य कार्यस्य च साक्षी न तु भोक्ता यतः
ईश्वरः देहादि परतंत्रः सत्य अतएव न तस्य ममत्वं पुत्र्यात् किंच संबंधाभावाद्भोक्तृत्वमकुरुतेति भावार्थः ११ द्विजनापि

न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा एकः सर्वधियां द्रष्टा कर्तृणां गुणदोषयोः १० नादत्त आत्मा हि गुणं न
दोषं न क्रियाफलं उदासीनवदासीनः परावरदृगीश्वरः ११ इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते त
दा विस्मिता मुमुचुः शोकं छित्वात्मस्नेहशृंखलां १२ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः तत्यजुर्दुस्त्यजं
स्नेहं शोकमोहभयार्तिदं १३ बालघ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं
१४ यमुनायां महाराज स्मरंत्यो द्विजभाषितं स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः गृहांधकूपान्निष्क्रांतः
सरःपंकादिव द्विपः १५ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः मौनेन संयतप्राणो ब्रह्मपुत्राववंदत १६
अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने भगवान्नारदः प्रीतो विद्यामेतामुवाच ह १७ नमस्तुभ्यं भगवते वासुदेवाय
धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च १८

तं ज्ञेयेरसाधोक्तं पुत्रादीनां दुष्परिहरत्वं स्मरंत्यः पुत्रका मन्त्रास्तु स्मानि सत्य इत्यन्वयः १४ निविडं यद्गृहं तदेवांध
यन्त्रिः कमण्डलुति धीरास्तत्सेव योग्यं तस्माल्लिमिस्त दृष्टान्तमाहुः सरसः पंकात् द्विजो गज इवेति १५ कृताः पुण्यजलक्रि
या पितृतर्पणं याभ्यां तेन संयतप्राणो नियतेंद्रियः १६ १७ नमो धीमहि ध्यायेम नमस्सानमस्तान मह इत्यर्थः १८ ॥

Indira Gandhi National
Centre for the Arts

निवृत्ताद्वैतदृष्टिर्यस्मात् १९ न्यस्ताः निरस्ताः शक्त्यूर्मयः मायानिमित्ता रागद्वेषादयो येन २० मनसा सह वचसि अप्राप्योपरते सति य एक एव प्रकाशते वचसीति सर्वेन्द्रियोपलक्षणं सोऽस्मानव्यात् सदसत्परः कार्यकारणयोः कारणं २१ तदेवाह यस्मिन्निदं कार्यं कारणं तिष्ठति अप्येति च यतश्च जायते मृण्मयेषु घटादिषु मृज्जातिर्मृत्सामान्यमिव सर्वानुस्यूतं यत्तस्मै २२ ननु सर्वानुस्यूतं चेत्तर्हि तज्ज्ञानं कथं मनो वचसोरप्राप्तिस्तत्राह यन्न स्पृशन्ति न विदुः प्राणाः क्रियाशक्त्यानु स्पृशन्ति मनआदीनि च ज्ञानशक्त्या विदुः तद्व्यापकत्वात् २३ तेषां तदज्ञाने हेतुमाह देहेन्द्रियादयोऽमी यदंशविद्धा यच्चैतन्यसंयोगेनाविष्टाः सन्तः कर्मसु स्वस्वविषये

नमो विज्ञानमात्राय परमानन्दमूर्तये आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये १९ आत्मानन्दानुभूत्यैव न्यस्तशक्त्यूर्मये नमः हृषीकेशाय महते नमस्तेऽविश्वमूर्तये २० वचस्युपरतेऽप्राप्य य एको मनसा सह अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः २१ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते मृण्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः २२ यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः अन्तर्बहिश्च विततं व्योमवत्तन्नतोऽस्म्यहम् २३ देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेति २४

प्रचरन्ति जाग्रत्स्वप्नयोः अन्यदा सुषुप्तिमूर्छादौ नैव प्रचरन्ति यथाऽप्रतप्तं लोहं न दहति अतो यथा लोहमग्निं नैव दाहकं न दहति तथा न तदृति एवं ब्रह्मगतज्ञानक्रियाशक्तिसंबन्धं प्राप्य प्रमाणादेहाद्यः तन्न स्पृशन्ति न विदुश्चेति भावः जीवस्तर्हि द्रष्टृत्वात् जानातु नेत्याह स्थानेषु जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञामात्रमेवैति प्राप्नोति नात्मा जीवो नाम कश्चिदन्योऽस्ति द्रष्टृसाक्षिकं यथा द्रष्टृवदेशं द्रष्टृसंज्ञं जीवमपि तदेव एति जानाति न तु जीवस्तज्जानातीत्यर्थः तदुक्तं दृश्यसाक्ष्युपाधिस्तो वेदेहो मनो बुद्धिरित्यादि २४



सकलानां ये सात्वतपरिवृढाः तेषां निकरस्य समूहस्य करकमलानां कुड्मलैरुपलालितं चरणारविन्दयुगलं यस्य संबोधनं परमेष्ठिन्सर्वेश्वर २५ एवमङ्गिरसा साकं ययाविति अङ्गिरसः प्राधान्येनोक्तः चित्रकेतोः पुत्रप्रदत्वेन तस्य पृथक्कृतत्वात् इह तु नारदेनाङ्गिरसा साकं ययाविति नारदस्य प्राधान्यं निर्दिष्टं तदुपदेशेन तस्य वैराग्योत्पत्तेः प्रजोत्पत्तिसमर्थः २६ यथा यथावद्धारयामास २७ विद्याधराधिपत्यमवान्तरफलं लेभे अप्रतिहतमस्खलितं २८ कतिपयैरहोभिः विद्यया इद्धेन दीप्तेन म

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविन्दयुगलपरमपरमेष्ठिन्नमस्ते २५ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ययावङ्गिरसा साकं धाम स्वायम्भुवं प्रभो २६ चित्रकेतुस्तु तां विद्यां यथा नारदभाषितां धारयामास सप्ताहमब्भक्षः सुसमाहितः २७ ततः स सप्तरात्रान्ते विद्यया धार्यमाणया विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप २८ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः जगाम देवदेवस्य शेषस्य चरणान्तिकं २९ मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकङ्कणं प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमण्डलैः प्रभुं ३० तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वस्थामलान्तःकरणोऽभ्ययान्मुनिः प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽनमदादिपूरुषं ३१

नसा गतिर्यस्य २९ मृणालवद्गौरं शितिवाससं नीलाम्बरं स्फुरन्ति किरीटादीनि यस्य कटित्रं कटिसूत्रं प्रसन्नावक्त्रारुणे लोचने यस्य तं चतेव ३० दृष्ट्वा च तमादिपुरुषं अभ्ययात् शरणं गतः अन्यमनुनापकर्षं नूनं तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य स्वस्थममलं चान्तःकरणं यस्य प्रणयेनाश्रुपूर्णे लोचने यस्य प्रहृष्टानि रोमाणि यस्य सः ३१

Indira Gandhi National
Centre for the Arts

भा०ष०स०
५१
तं प्रसमीडितुं चिरं नैवाशकत् अशक्तत्वे हेतुः उत्तमश्लोकस्य पादाब्जयोर्विष्टरमासनं उपमेहयन् आर्द्रीकुर्वन् प्रेम्णा उपरुद्धः अखिलानां वर्णानां निर्गम उच्चारणं यस्य सः ३२ मनीषया बुद्ध्या मनः समाधाय एतद्बभाषे प्रतिलब्धा वाग्येन सः सात्वतशास्त्राभिव्यक्तो विग्रहो यस्य तं ३३ अन्योन्यप्रेमजानन्दनिर्वृतात्मस्वामिसेवकान् आह नेदं स्तुदास्तोति द्वाभ्यां पंचभिर्विजितैरुक्त अजित अजेय जितोऽपि भवान् साधुभिर्जितः स्वाधीन एव कृतः यतो भवानपि अतिकरुणः तेऽपि निष्कामाः अपि भवता विजिताः यो भवानका मात्मनामात्मानमेव ददाति ३४ ननु ब्रह्मादिरेव जित इति कथं सर्वमैश्वर्यं ब्रह्मादिकर्तृत्वमैश्वर्यैर्जितं तवैव तत्राह तवे

स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरं ३२ ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ नियम्य सर्वेन्द्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहं ३३ अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः ३४ तव विभवः खलु भगवन् जगदुदयस्थितिलयादीनि विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्धन्ति पृथगभिमत्या ३५ परमाणुपरममहतोस्त्वमाद्यन्तान्तरवर्ती त्रयविधुरः आदावन्ते च सत्त्वानां यद्ध्रुवं तदेवान्तरालेऽपि ३६ छ

ति जगदुदयादीनि तवैव विभवः महिमानो लीला इत्यर्थः आदिशब्देन नियमादीनि विश्वसृजो ब्रह्मादयो नेश्वराः किंतु तेंऽशांशा ये पुरुषः तस्यांशाः तत्र एवं स्थितेऽपि पृथक् ईश्वरा वयमित्यभिमानेन स्पर्धन्ते ३५ तमेव स्रष्टादिकर्तृत्वेनोपपादय ति परमाणुः सूक्ष्मं स्थूलकारणं परममहत् अंतिमकार्यं तयोः त्वमेवाद्यन्तान्तरवर्ती आद्यन्तमध्येषु वर्तिसि तर्हि विलयस्य सत्त्वं एव त्रयविधुरः आद्यन्तमध्यरहितो ध्रुवः तेषु च तथात्वं तेन तु ध्रुवाः कुतः इत्याह सत्त्वानां सत्त्वेन प्रतीतानां कार्याणामादावन्तेऽपि अन्तरालेऽपि तदेव ध्रुवं सुवर्णादिवत् ३६ रामः ५१

एवं ध्रुवत्वेन कालतः परिच्छेदो नास्तीत्युक्तं देशतोऽप्यपरिच्छेदमाह क्षित्यादिभिरिति सर्वस्माद्दशगुणोत्तरैरधिकैरावरणैः यत्र त्वयि अणुकल्पः पतति परिभ्रमति तत्र स्मादनन्तस्त्वं ३७ यस्मादेवं परमेश्वरस्त्वमीश्वरस्त्वमेव अन्ये देवास्तव विभूतयः अतस्त्वां विहाय विषयकामनया अन्योपासका अतिमंदा इत्याह विषयेषु तृष्णा येषां ते नराकाराः पशव एव कुतः ये विभूतीरिन्द्रादीन् उपासते न तु परं त्वां ततः किं तत्राह तेषामिति तदनु उपास्यनाशानन्तरं यथा राजकुले कनु राजकुलनाशेन तं पत्तेव कानां आशिषो नश्यन्ति तद्वत् अयं च परमो विधिर्मनोऽपि न नृपस्यैव ३८ विषयकामेनापि विहिता त्वत्सेवा मोक्षफलैवेत्याह कामधिय

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरण्डकोशः यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिस्तदनन्तः ३७ विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वां तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलं ३८ कामधियस्त्वयि रचिता न परम रोहन्ति यथा करम्भबीजानि ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि ३९ जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यं निष्किंचना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ४० श्री

कामनाऽपि ईश परमस्त्वयि रचिताः कृताश्चेत् न रोहन्ति देहान्तरोत्पत्तये न भवन्ति करम्भबीजानि भर्जितबीजानि यथा यतोऽस्य जीवस्य गुणगणाद्द्वंद्वजालानि भवन्ति अतः कामेनापि निर्गुणस्य तव भजनान्नैर्गुण्यं भवतीत्यर्थः ३९ फलकामनयापि त्वदाराधने यदा मोक्षहेतु तदा किं वक्तव्यं भागवतधर्मे माहात्म्यमिति विवक्षंस्तत्प्रदायप्रवर्त्तकत्वेन भगवन्तं स्तौति जितमिति यदा भगवान् भागवतं धर्ममाह तदा हे भगवन् त्वया जितं सर्वोत्कर्षेण स्थितं तत्र हेतुर्येन निष्किंचनाः सनत्कुमारादयो मुनयस्ते यं भवंतं अपवर्गाय सेवंते तेन भवता जितं यं धर्मं प्रतिवा ४० श्री छ

Indira Gandhi National
Centre for the Arts

भा०१०स०
५२

अनवद्यतामेवाह विषममतिर्यत्र यस्मिन् भागवते धर्मे नास्ति यदन्यत्र यथा तस्मिन् काम्यधर्मे न तु सोऽपि वेदोक्तत्वादनवद्य
एव तन्नाह विषमधिया शत्रुमरणादिकामनया रचितो यः स ह्यविशुद्धः रागद्वेषादिमत्वात् क्षयिष्णुश्च नश्वरफलत्वात्
अधर्मबहुलश्च हिंसादिव्याकुलत्वात् तदुक्तं शास्त्रकारैः श्येनेनाभिचरन्यजेतेत्यादि ४१ एतद्
उपपादयति कः क्षेमः किं कुशलं किं वित्तं निजपरयोः स्वस्य परस्य च स्वपरद्रुहा स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रु
ग्धर्मेण यतः स्वद्रोहात् असंतकायक्लेशात् तव कोपः पीडा संभवति तदुक्तं गीतासु कर्शयंतः शरीरस्थं भूत

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहु
लः ४१ कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण स्वद्रोहात्तव कोपः परसंपीडया च तथाऽधर्मः ४२ न व्यभि
चरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः स्थिरचरसत्त्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः ४३ न हि भगव
न्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः यन्नामसकृच्छ्रवणात् पुक्कसकोऽपि विमुच्यते संसारात् ४४ ॥

राम:
५२

ग्राममचेतसः मां चैवांतः शरीरस्थं तान्विध्यासुरनिश्चयानिति तथा परसंपीडयाऽधर्मः चशब्दात्तव कोपश्च अतस्त्व
यं रागाद्यधमपि कथं विद्वद्मार्गे प्रवर्तयितुं काम्यधर्मोऽभिहितो न तत्त्वदृष्ट्या ४२ भागवतधर्मे तु न दोष इत्याह
न व्यभिचरति न परमार्थं जहाति तवेक्षा दृष्टिः अपृथग्धियो भेदरहिताः स्थावरजंगमप्राणिसमूहेषु समबुद्धयो भागवतानां धर्मं
सेवितं ४३ एवंभूतस्य भागवतधर्मस्य वक्तुः किमुत त्वद्दर्शनात् सर्वपापक्षयो भवतीति किं चित्रमित्याह न हीति ४४ ॥

---

अतोऽहं कृतार्थोऽस्मीत्याह अथेति अत इदानीं तवावलोकनेन परिमृष्टा निरस्ता आशयस्य चित्तस्य मला येषां ते त्वद्दर्शने च मम नारदोप
दिष्टो न जातमित्याह सुरर्षिणेति ४५ यथाऽहं चाद्य सर्वं प्रतिनिवृत्तश्चासं यथा च नारदेनानुगृहीतोऽस्मि तत्सर्वं त्वं जानासि यन्मया किंचित्प्रका
शनीयमित्याह विदितमिति निर्विशेषेण ज्ञाप्यं प्रकाशनीयं कियदिव न किमपीत्यर्थः सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत् ४६

अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरर्षिणा यत्कथितं तावकेन कथमन्यथा भवति ४५ विदि
तमनंत समस्तं तव जगदात्मनो जनैरिहाचरितं विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ४६ नमस्तुभ्यं भ
गवते सकलजगत्स्थितिलयोदयेशाय दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ४७ यं वै श्वसंतमनु
विश्वसृजः श्वसंति यं चेकितानमनु चित्तय उच्चकंति भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु स
हस्रमूर्ध्ने ४८ । संस्तुतो भगवानेवमनंतस्तमभाषत विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ४९
यन्नारदांगिरोभ्यां ते व्याहृतं मेऽनुशासनं संसिद्धोऽसि तया राजन् विद्यया दर्शनाच्च मे ५०

उक्तलक्षणं भगवंतं प्रणमति नम इति द्वाभ्यां सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय दुरवसिताय समर्थाय दुरवसिता
अविज्ञाता आत्मगतिर्निजतत्त्वं यस्य केषां कुयोगिनां केन भिदा भेददृष्ट्या ४७ श्वसंतं विचेष्टं ते चेकितानं प्रबुध्यमानमनु चित्तयः ज्ञा
नेंद्रियाणि उच्चकंति साक्षात्प्रकाशंति ४८ ४९ मेऽनुशासनं मद्विषय उपदेशः तेन च तया विद्यया मम च दर्शनात्संसिद्धोऽसि ५०

Indira Gandhi National
Centre for the Arts

भा०६०अ०१६ तद्बोधस्यार्थायस्वयमप्युपदिशति अहमित्यादिना सर्वभूतात्मत्वादेव भूतात्मा भूतानां भावनः शब्दब्रह्म वेदात्मकं नामात्मकं
नकोऽप्यहमेव भोक्तृभोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः यतोऽहं भूतभावनः भूतानां भावकाः कारणं च न
५३ नु शब्दब्रह्मवाचकात्मकोऽपरं ब्रह्म कारणं वाचकात्मकं च तदुभे अपि ममैव रूपे इत्याह शब्दब्रह्मेति शाश्वती तनू ५१ अत
स्वमेव यस्मात् लोके लोकप्रपंचे कार्ये ईश्वरत्वेन विततमनुगतमात्मानं लोकं चात्मनि भोग्यत्वेन संततं व्याप्तं तदुभयं च मयाका
रणात्मना व्याप्तं मयि चैवोभयं कृतं कल्पितं स्मरेदिति तत्राये नान्वयः परोपदिष्टत्वादसंगा ५२ ननु जाग्रदाद्यवस्थाभेदेन
भोक्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशंक्याह स्वप्नगत जाग्रदादिदृष्टांतेन संभवमित्याह यथे
ति द्वाभ्यां यथा स्वप्ने सुप्तो विश्वं गिरिवनादिरूपं देशांतरस्थमात्मन्येव पश्यति स्वप्नमध्ये सुसुप्तिं स्वप्नं च पश्यंती

अहं वै सर्वभूतानि भूतात्मा भूतभावनः शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ५१ लोके विततमात्मानं लो
कं चात्मनि संततं उभयं च मया व्याप्तं मयि चैवोभयं कृतं ५२ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि आत्मानमेकदे
शस्थं मन्यते स्वप्न उत्थितः ५३ एवं जागरणादीनि जीवस्थानानि चात्मनः मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरे
त् ५४ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां ५५ श्री

सर्थः तथा स्वप्न एव उत्थितः सन् आत्मानं एकदेशस्थं शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ५३ एवं प्रसिद्धा टीका:
न्यपि जागरादीनि जीवस्थानानि जीवस्यावस्था जीवो पाधेर्बुद्धेरवस्था आत्मनो मायामात्राणीत्येवं विज्ञाय तेषां द्रष्टारं अ ५३
त एव परं तदवस्थारहितमात्मानं स्मरेत् ५४ ननु तेषां द्रष्टारं प्रतिकथमुच्यते दृश्यमानत्वेन तद्द्रष्टत्वाभावात् तत्रा
ह येनेति सुप्तः पुरुषो जीवः येन स्वेन तदा स्वापकाले आत्मनः स्वापं निर्गुणं अतींद्रियसुखं च वेद तमात्मानं ब्रह्म
मामवेहि तदा स्वापसुखसुषुप्त्योरसंवेदने सुखमहमस्वाप्समिति स्मृतेरसंभवात् ५५

ननु स्वापसाक्षिणा दृष्टं कथं जाग्रदवस्थः स्मरेत् नह्यन्येन दृष्टमन्यः स्मरति तत्राह उभयं प्रस्वापं प्रतिबोधं च स्मरतः अनुसंदधतः तयोः
प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति नास्मां व्यतिरेके तत्र एकैकायायेप्यनपायात् तत् ज्ञानं परं ब्रह्म तदेव न तु भिन्नमित्यर्थः
अतो यात्मा दृष्टस्मर्त्रो वैनैस्मृतिवदवस्थान्तरत्वेऽपि स्वापजाग्रतोः स्मरणं घटत इति भावः तदेवं भूतं ब्रह्मात्मानमवैशानेन ५६
विस्मृतदोषमाह यदि एतत्स्वरूपं नाववंत्स्वरूपं ब्रह्म विस्मृतं तदात्मनः सकाशात् भिन्नं भवति ततएतस्य पुंसः संसारो भवति संसा

उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः अन्वेति व्यतिरिच्येत तत् ज्ञानं ब्रह्म तत्परं ५६ यदेतद्विस्मृतं पुंसो मद्भावं
भिन्नमात्मनः ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ५७ लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवां आत्मानं यो न बु
ध्येत न क्वचित् क्षेममाप्नुयात् ५८ स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययं अभयं चाप्यनीहायां संकल्पाद्विरमेत्क
विः ५९

रस्वरूपमाह देहाद्देहं जन्मांतरं पुर्ज्जन्म मृतेरनंतरं पुनर्जन्म मृतेरनंतरं मृतिश्चेति ५७ योऽमंतरेविद्योपादि संपादनं राकं ज्ञाना
र्थं लब्ध्वेव यतितव्यमित्याह लब्ध्वेति ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं तयोः संभवो यस्यां तां यस्यां तां ५८ वैराग्यार्थमाह इहायां
प्रवृत्तिमार्गो तत ईहातः अनीहायां निवृत्तिमार्गेषु अभयं मोक्षो भवतीति च स्मृत्वा फलसंकल्पाद्विरमेत् पाठांतरे नोभयं
परिक्लेशः फलविपर्ययश्च न स्तीत्येवं स्मृत्वा ५९

Indira Gandhi National
Centre for the Arts

स्का०ष०स्त्र०
५४

एतद्विदित्वोति सुखायेति त्रिविधिः दुःखस्यात्तिरिति सुखस्याप्तिः त्रिज्ञाः उद्यमेषु बीलवर्यातिसन्निभात्मवतं स्याम्नयविलक्षणं तुरीयं बुद्धी ६० दृष्टश्रुतानिर्भोगान्निरोद्दिकामुष्मिके विषयैः स्वेनते जगाविवेकबलेन ६१ नवातः परः पुरुषार्थोस्तीत्या इत्यतावान्निति योगेनैषु एषयस्याः सा बुद्धिर्येषां परस्याः सा बुद्धिर्येषां परस्यात्मन एकं दर्शनमिति यत् एतेषामेव ६२ ६३

सुखाय दुःखमोक्षाय कुर्वीतेदं प्रतीक्रियाः ततोऽनिरूप्ति रपाप्ति दुःखस्य च सुखस्य च ६० एवं विपर्ययं बुध्वा व्रणं विज्ञानिमानिनां आत्मनश्चागतिस्तसां स्यान्नयदिलक्षणं ६१ दृष्टश्रुतानिर्भोगान्ति निर्मुक्तः स्वेन तेजसा ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषोऽनवत् ६२ एतावानेव मनुजैः योगनैपुण्यबुद्धिभिः स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं ६३ त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि ६४
आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः ६५
यतश्चान्तर्हितो नंत तस्मै कृत्वा दिशे नमः

विद्याधरश्चित्रकेतुश्चचार गगनेचरः १ स लक्षं वर्षलक्षाणां अव्याहतबलेन्द्रियः स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः २ कुलाचलेन्द्रद्रोणीषु नानासंकल्पसिद्धिषु रेमे विद्याधरस्त्रीभिर्गाययन्हरिमीश्वरं ३

शष:
५४

६४ ६५ ततः स सदरोमोघ मर्द्धिं प्राप्य खेचरत्वं विरस्मागिरित्राणापाङ्गमायात्रलांगतः १ यतः यस्मात् तस्मै दिशे नमः नमस्कृत्वा २ स विद्याधरस्त्रीभिर्हरिंगापयन् रेमे द्रोणिद्वयोः रत्नयः अव्याहतं बलमिंद्रियाणि च यस्य नानाविधाः संकल्पेनैव सिद्धयो यासु तासु ३

अकस्मात् कुलेश्वर्यगर्वान्प्राचीनकर्मतः आसुरीयोनिमापन्नो नवात्रीरायतः स तु तदाह एकेंदेसादिना अंगीकृतं उक्तंगैनैकीकृत्य देवं वाक् नाऽलिंग्य स्थितं उवाच जरासवतस्यांतिके स्थितः स न ५ धर्मवक्ता वदति शरीरिणं मध्येपु रमश्च नार्यायामिथुनीनत्यवास्ते ६६ अगाधागंगीराधीर्यस्य सः ७ ततस्य वीर्यं प्रज्ञां व विधानं अन्यवीर्यविषां नत स्मिन्

एकदा स विमानेन विष्णुदत्तेन भास्वता गिरिशं ददृशे गच्छन् परीतं सिद्धचारणैः ४ आलिंग्यांकीकृतां देवीं बाहुना मुनिसंसदि उवाच देव्याः शृण्वंत्या जहासोच्चैस्तदन्तिके ५ एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणां आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ६ जटाधरस्तीव्रतपा ब्रह्मवादिसभापतिः अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ७ प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति अयं महाव्रतधरो बिभर्ति सदसि स्त्रियं ८ भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ९ इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनं रुषाह देवी धृष्टाय निर्जितात्माभिमानिने १० अयं किमधुना लोके शास्ता दण्डधरः प्रभुः अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् ११ न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्तिनं हरं १२ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयं यः क्षत्रबन्धुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दण्ड्यः १३

तर्जितात्माभिमानिने जितेंद्रियोऽहमिति मनिना १० इति क्रोधाक्रोधेनाह विरुद्धं प्रकर्षेण करोतीति विप्रकृत् ११ अतिवर्तिनं शास्त्रमतिक्रम्य वर्तमानशीलं ये नो निषेधंति न वारयंति १२ एषां ब्रह्मादीनामनुध्येयं पदाब्जयुग्मं यस्य तं मंगलेभ्यः परमधर्ममूर्तिं सूरीन् परिभूय प्रशास्ति स्वयं दण्ड्यः प्रशास्ति तस्मात् ॥१३॥ ॥श्री॥

Indira Gandhi National
Centre for the Arts

भा०ष०स० ननु दृप्तिको यं दंडार्ह इति चेन्नत्याह नायं साधुभिः दिसेवितं वैकुंठस्य पादमूलोपसर्पणमर्हति यतः संभावितात्मा अस्मदधिकर
५५ तिरित्ता मतिर्येनअत एवस्तब्धः अनम्रः १४ तदेवं स्वयं दंड्यत्वं निश्चित्य तस्य आह अत इति हेतुत्रय यथा भूयो महतां किल्बिषं परा
धनं कर्त्ता न करिष्यसि तथा याहीत्यर्थः १५ १६ पूर्वदिष्टं प्राचीनकर्मणामेव १७ अयं च संसारचक्र स्वभावएव नविचित्र इत्याह संसार

नायमर्हति वैकुंठपादमूलोपसर्पणं संभावितमतिस्तब्धः साधुभिः पर्युपासितं १४ अतः पापीयसीं योनिमासुरीं
याहि दुर्मते यथेह भूयो महतां न कर्त्ता पुत्र किल्बिषं १५ अतः पापीयसीं योनिमासुरीं याहि दुर्मते एवं शा
प्तश्चित्रकेतुर्विमानादवरुह्य सः प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत १६ प्रतिगृह्णा
मि ते शापमात्मनोंजलिनांबिके देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् १७ संसारचक्र एतस्मिन् जंतुरज्ञान
मोहितः भ्राम्यन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा १८ नैवात्मा न परश्चापि कर्त्ता स्यात्सुखदुःखयोः कर्त्तारं
मन्यते प्राज्ञ आत्मानं परमेव च १९ गुणप्रवाह एतस्मिन्कः शापः कोन्वनुग्रहः कः स्वर्गो नरकः को वा किं सुखं
दुःखमेव वा २० एकः सृजति भूतानि भगवानात्ममायया एषां बंधं च मोक्षं च सुखदुःखं च निष्कलः २१

रामः
५५

चक्र इति १८ अत एवात्मनः परत वचनको प्रदोषस्त्याह नैवेति एवं तावत्सुखदुःखादिकमंगीकृत्योक्तं १९ इदानीं तदपि वस्तुतो
नास्तीत्याह गुणानां प्रवाहे संसारे २० न नु पापापुण्यानां चेदयं प्रवाहस्तर्हि तेषां जडत्वाद्धर्मोत्पादकत्वेन स्यात्तत्रा
ह एकः परमेश्वरो मायया भूतानि सृजति तथाविधाभिः सृजति एषां बंधादिकं सृजति निष्कलः स्वयं बंधादिशून्यः २१

नन्वेवं सूत्रविषमसृष्टौ तस्य किं कारणं प्रियादिवैषम्याभावादित्याशंक्य यद्यपि प्रियादयो न संति तथापि तत्तत्कर्मवशात्सर्वं घटत इत्या
ह न तस्येति द्वाभ्यां प्रतीपः शत्रुः ज्ञातिबंधुश्चेत्यर्थः तत्र हेतुः सर्वत्र समस्य तत्कुतः निरंजनस्य निःसंगस्य अत एव तन्निमित्तः सुखे रागो
नास्ति रागानुबंधो रोषः कुतः स्यात् २२ यद्यप्येवं तथापि तस्य शक्त्या मायया यो विसर्गः पुण्यपापादिलक्षणं कर्म एषां शरीरिणां सुखा

न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः समस्य सर्वत्र निरंजनस्य सुखे न रागः कुत एव रोषः २२ तथापि त
च्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतये वकल्पते २३ अथ
प्रसादये न त्वां शापमोक्षाय भामिनि यन्मन्यसे ह्यसाधूक्तं मम तत्क्षम्यतां सति २४ श्रीशुक उ० इति प्रसाद्य गिरि
शौ चित्रकेतुररिंदम जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः २५ ततस्तु भगवान्रुद्रो रुद्राणीमिदमब्रवीत् देव
र्षिदैत्यसिद्धानां पार्षदानां च शृण्वतां २६ श्रीरुद्र उ० दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः माहात्म्यं भृत्यभृत्या
नां निस्पृहाणां महात्मनां २७ नारायणपराः सर्वे न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः २८

यर्थं च अवकल्पते समर्थो भवति यथोक्तं गीतासु भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित २३ अपलस्मात् हे भामिनि कोपने त्वां के
वलं प्रसादयामि न तु शापमोक्षाय तर्हि किं प्रसादनेनात आह मयोक्तं साध्वपि असाधु मन्यसे तत् त्वया क्षम्यतां २४ गौरीशौ भवा
नीशं करौ प्रसाद्य स्मयतो विस्मयं कुर्वतोस्तयोः २५ २७ स्वर्गादावेव तुल्यो र्थः प्रयोजनमिति द्रष्टुं शीलं येषां ते तथा श्री २८ श्री

भा०६०अ०१ तत्र तद्भक्तेष्वेवं तमाह द्वाभ्यां देहिनां सुखदुःखमित्रादिद्वंद्वं नीश्वरस्य लीलया मायया भवंति २८ तेषु च गुणदोषविकल्पश्चेत्ते
५६ वेत्यन्वयः दृष्टान्तश्च भेद इवयः स्फुरति स आत्मन्यर्थभेदः सुखादिभेदः पुंसः स्वप्नेयथा अविवेककृतो भवति स्रजिव सर्पमालादि
भिर्यथा तथैव कृतइत्यर्थः स्रग्वदिति क्वचित्पाठः स्रजिवदित्यत्र कर्मणि स्रजि वदिति सार्वविभक्तिकस्तरेत्युपगम ३० अतो भागवतानां निस्पृह
त्वमुचितमेवेत्याह वासुदेव इति ज्ञानवैराग्ययोर्वीर्यं बलं येषां तेषां व्यपाश्रय विशिष्टं सुखमाश्रयणीयो यो नास्ति ३१ अस्य

देहिनां देहसंयोगात् द्वंद्वानीश्वरलीलया सुखंदुःखंमृतिर्जन्म शापोऽनुग्रह एव च २८ अविवेककृतः पुंसो ह्यर्थभेद
इवात्मनि गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः २९ वासुदेवे भगवति भक्तिमुद्वहतां नृणां ज्ञानवैराग्य
वीर्याणां नेह कश्चिद्व्यपाश्रयः ३० नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः विदाम यस्येहित
मंशकांशका न तत्स्वरूपं पृथगीशमानिनः ३२ नह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा आत्मत्वात्
सर्वभूतानां सर्वभूतप्रियो हरिः ३३ तस्य चायं महाभाग श्चित्रकेतुः प्रियोऽनुगः सर्वत्र समदृक्शांतो ह्यहं चैवाच्यु
तप्रियः ३४ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु महापुरुषभक्तेषु शांतेषु समदर्शिषु ३५
इति श्रुत्वा भगवतः शिवस्योमाभिभाषितं बभूव शांतधी राजन् देवी विगतविस्मया ३६ श्रीराम ॥

राम:
५६

यद्यपि दासत्वेन तस्य भाव त्वात्तेन चित्रमिति विलक्षं हरेर्माहात्म्यमाह नाहमिति द्वाभ्यां ईहितमभिप्रायं लीलां वा यद्दा वयं न वि
द्मस्तदा तत्स्वरूपमंशकांशा अपि संतः पृथगीशमानिनो न विदुरेवेव ३२ अतएव हरिरपि सर्वेषां भूतानां प्रिय ३३ अहं चैवा
च्युतस्य प्रियं तस्मादस्मास्मिन् कोधो नत्दितिभावः ३४ ३५ ३६ श्रीराम: छै

प्रतिसापं दातुमलं तमः समर्थतमोपि ३७ ३८ असुरजातेः असुरभावेनोत्पत्तेः भगवति मतेश्च ३९ ४० एतत्तत्रं ४१
आदित्यानां चतुर्थस्य त्वष्टुर्वंश्रवंसंगतः वेधः मिंद्रकृतं विश्वरूपपरत्ववधादिकं १ अदितेः पंचमादीनां पुत्राणां
मन्वयोक्तितः अष्टादशेदितेर्गर्भे शक्रेणमरुतां भिदा ४ त्वष्टुर्वंशमनुक्रम्य सप्रसंगं यथाक्रमं आदित्यानामन्येषां वंशानाहसु
नीश्वरः इत्युकम्यान्वयानुकथ्यते अदित्याः द्वादशपुत्राः प्रोक्ताः विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः धाता विधाता वरुणोमि

इति भागवतो देव्याः प्रतिशाप्यमलं तमः मूर्ध्ना संजगृहे शाप मेतावत्साधुलक्षणं ३७ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीयो
निमाश्रितः वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ३८ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि वृत्रस्यासुरजातेश्च
कारणं भगवन्मतेः ३९ इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ४०
य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् इतिहासं हरिंस्मृत्वा सयाति परमां गतिं ४१
पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं त्रयीं अग्निहोत्रं पशुं सोमं
चातुर्मास्यं महामखान् १ सिद्धिर्भगस्य भार्यांग महिमानं विभुं प्रभुं आशिषं च वरारोहां कन्यां प्रासूत सुव्रतां २ धातुः कुहूः सिनी
वाली राका चानुमतिस्तथा सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् अग्नीन्पुरीष्यानाधत्त क्रियायां समनंतरः ३

चत्राकेतुस्तकमहति तत्र अष्टाध्यायां तरमारस्य विश्वरूपहत्वविवकेत् पापानैः त्वष्टुर्वंशमनुवर्ण्य इदानीं सवितुर्वंशमाह प्ट
श्निरिति सावित्र्यादिषु श्रास्तेसुत्तरस्याऽनुषंगः पंशुपशुयागं महामखान्पंचयज्ञान् १ धातुर्भार्या कुहूः प्रासूयत एवं
सिनीवालीदर्शमित्युक्तं समनंतरो विधाता क्रियायां भार्यायां पुरीष्यनामी पंचविताः पुरीष्यासो अग्नय इति पंचचीएते
योयश्चितयइति श्रुते ३

भा०ष०स० चर्षणी वरुणस्य भार्यासीत् पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः वल्मीकिर्वरुणस्यैव पुत्रो ऽभवत् एतौ वरुणस्य साधारणौ
५८ पुत्रौ ४ तयोः कर्मादयो मित्रस्य साधारणाः तयोरेव साधारणाः तयोरेव साधारणौ द्वौ पुत्रौ चाह अगस्त्यश्च वसिष्ठश्च ऋषी मित्रावरुण
योः स्कन्नं तायत उर्वशी कुंभे रेतः सिषिचतुः स्तुतज्जाता विसृतात्मनोर्निः कुंभे रेतः सिषिचतुः समानमिति श्रुतं द्रुतं स्वन्नं ५ ६

चर्षणी वरुणस्या ऽसीद्यस्यां जातो भृगुः पुनः वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ४ अगस्त्यश्च वसिष्ठश्च मित्रा
वरुणयोर्ऋषी रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतं ५ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् पौलोम्यामिंद्र आध
त्त त्रीन्पुत्रानिति नः श्रुतं ६ जयंतमृषभं तात तृतीयं मीढुषं प्रभुः ७ उरुक्रमस्य देवस्य मायावामनरूपिणः कीर्तौ पत्न्यां
बृहच्छ्लोक स्तस्यासन्सौभगादयः ८ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः पश्चाद्वक्ष्यामहे ऽदित्यां यथैवा ऽवततार
ह ९ अथ कश्यपदायादान् दैतेयान्कीर्तयामि ते यत्र भागवतः श्रीमान् प्रह्लादो बलिरेव च १० दितेर्द्वावेव दा
यादौ दैत्यदानववंदितौ हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ११ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी
जंभस्य तनया सा तु सुषुवे चतुरः सुतान् १२ संह्लादं प्रागनुह्लादं ह्लादं प्रह्लादमेव च तत्स्वसा सिंहिका नाम राहुं विप्र
चितो ऽग्रहीत् १३ शिरो ऽहरद्यस्य हरिश्चक्रेण पिबतो ऽमृतं संह्लादस्य कृतिर्भार्या ऽसूत पंचजनं ततः १४ ह्लादस्य धमनि
र्भार्या ऽसूत वातापिमिल्वलं यो ऽगस्त्याय त्व ऽतिथये पेचे वातापिमिल्वल १५ श्रीरामजी रामः ५७

पश्चात्त्वष्टम स्कंधे १९ अथेति कश्यपस्य दितेः पुत्राणां प्राद्र्हादिसारं संततिमुच्यादितेः पुत्रान् कथयामीत्यर्थः हिरण्यकशिपुर्हि
रण्याक्षश्चेति प्रथमं द्वावेव तौ च कीर्तितौ तृतीयस्कंधे विप्रचितो दानवात् सर्वः सकाशाद्राहुं पुत्रमग्रहीत् ततः संह्ल १५ ॥

ततो बलेः सकाशाद्बाणो ऽभवत् तस्य बलेरनुभावः श्लोक्यं कीर्तनार्हं यथा अनुभाव्यते सद्भिः स्तूयत इत्यनुभावं सुश्लोक्यं यश इति
शेषः १९ तस्य गणेषु मुख्यतां प्राप्तं २० सात्मतां समानरूपतां देवत्वं प्रापिताः २२ २३ आदत्तसादरं अल्पमिताहारं अर्थचत्व
र्थयुक्तं सत्त्वमयनमाश्रयो यस्य हिंसत्या लालो निका २४ पार्ष्णिग्राहेण पृष्टतः सहायेन २५ त्वाष्टहंतारं इंद्रं मारयित्वा सुखिनी स्यामि

अनुह्लादस्य सूर्म्यायां बाष्कलो महिषस्तथा विरोचनस्तु प्राह्लादिर्देव्यां तस्या ऽभवद्बलिः १६ बाणज्येष्ठं पुत्रशतमशना
यां ततो ऽभवत् तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते १७ बाण आराध्य गिरिशं लेभे तद्गणमुख्यतां यत्पार्श्वे
भगवानास्ते ह्यद्यापि पुरपालकः १८ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः त आसन्नप्रजाः सर्वे नीता इंद्रेण सा
त्मतां १९ [illegible] कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो इंद्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः २२
इमे श्रद्दधते ब्रह्मन् ऋषयो हि मया सह परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि २३ [illegible] तद्विष्णुरात
स्य स बादरायणिः वचो निशम्य ऽदृतमल्पमर्थवत् सभाजयन्संनिभृतेन चेतसा जगाद सत्रायण सर्वदर्शनः २४
[illegible] हतपुत्रा दितिः शक्र पार्ष्णिग्राहेण विष्णुना मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत् २५ क
दा नु भ्रातृहंतारमिंद्रियाराममुल्बणं अक्लिन्नहृदयं पापं घातयित्वा शये सुखं २६ कृमिविड्भस्मसंज्ञासीद्यस्ये
शाभिहितस्य च भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः २७

तिचिंतयामासेति उल्बणं क्रूरं अक्लिन्नहृदयं कठिनं राजा स्वदेहस्यार्थं मन्येषां घातं करोत्येव किमत्र चित्रं तत्राह कृमीति ईशाः
प्रभुरिति अभिहितस्यापि यस्य सर्वेषां मृतदेहस्य मरणानंतरं क्रिमिरिनाव स्थितस्य कृमय इति श्वादिभिर्भक्षितस्य तु विष्टेति दग्ध
स्य तु भस्मेति संज्ञा ऽभासीत् तत्कृते तस्य देहस्यार्थं यो भूतेभ्यो द्रुह्यति स्वार्थं वेदैव तत्र हेतुः यतो भूतद्रोहान्निरयो भवति २७

Indira Gandhi National Centre for the Arts

इंद्रं देहादिकं कृत्वं निरस्य आत्मानं तस्य मानस अत उक्तं द्वन्द्व त्वं लंघेते यस्तस्येंद्रस्य यो मदस्तस्य शोषकः पुत्रो मे येन द्रे
तुनाभूयात्सुभवेत् २६ भर्तुः प्रियाचरणमेवेति भविनस्य भर्तृप्रियं मर्त्यं दाचचार २७ ३० विवृताः स्त्रीयं तेन नः सन् वामस्तव मनो
रथं यदि यि अत्प्रीत्यिदाहमनचिंत्य ३१ तत्रहेतुमाह त्रिलोक्येति एकांतभक्तानिति संगानि मेथुनेनाह इव यथार्थं स्वदेहार्द्धमेव

आराधितानस्य तस्येदं कुचमुत्त्वचेतसः मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे २८ इति भावेन सा भर्तुराचचारासकृत्प्रियं शुश्रूषयानुरागेण प्रश्रयेण दमेन च २९ भक्त्या परमया राजन् मनोज्ञैर्वल्गुभाषितैः मनो जग्राह भावज्ञा सुस्मितापांगवीक्षणैः ३० एवं स्त्रिया जडीभूतो विद्वानपि मनोज्ञया बाढमित्याह विवशो न तत्चित्रं हि योषिति ३१ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता ३२ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ३३ वरं वरय वामोरु प्रीतस्तेऽहमनिंदिते स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ३४ पतिरेव हि नारीणां दैवतं परमं स्मृतं मानसः सर्वभूतानां वासुदेवः श्रियःपतिः ३५ स एव देवतालिंगैर्नामरूपविकल्पितैः इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् ३६



स्त्रियं चक्रे ३२ इह च कारात्सरत्नच अगमः अप्राप्यः ३४ ननु परमेश्वरे सुप्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह पतिरेवेति ननु मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवमिति प्रसिद्धं सत्यं स एव स्वाधिकारेण रूपभेदैः पूज्यत इत्याह मानस इति सार्द्धेन देवतालिंगैः मूर्त्तिचिह्नरूपलक्षितः तान्येवाह नामरूपादिरूपैः भक्तहस्तात्पूज्यां विविधं कल्पितैः ३६ श्री

इंद्रहनं इंद्रहंतारं अमृत्युं मृत्युभूतं येन इंद्रेण विष्णुना सहायेन घातितौ ३९ ४० स्वभावमनुवर्तमानाया योषितः कौशिकमोऽपराधः ४१ स्वभावमेवाह धार्म्यांशारस्य इत्येवोत्तमो विकारो यस्मिन् अवलोक्यतीत योऽमृतं क्षुरधारोपमं चित्तं ४२ स्वाशिषाम् आत्मार्थकामनया भ्रमते हि तस्येन प्रतीयमानानां ४३ तत्रेमुपकल्पेते योगं पुनर्भवति अयं भावः वैष्णवं व्रतं तावदपदेशामि ते

तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे यजंतेऽनन्यभावेन पतिमात्मानमीश्वरं ३८ सोऽहं त्वयार्चितो भद्रे ईदृग्भावेन भक्तितः तत्ते संपादये काम असतीनां सुदुर्लभं ३७ वरदो यदि मे ब्रह्मन् पुत्रमिंद्रहणं वृणे अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ ३९ निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत अहो अधर्मः सुमहानद्य मे समुपस्थितः ३९ अहो अर्थेंद्रियारामो योषिन्मय्येह मायया गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवं ४० कोतिक्रमोऽनुवर्तंत्याः स्वभावमिह योषितः धिङ्मां बताबुधं स्वार्थे यदहं त्वजितेंद्रियः ४१ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतं हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितं ४२ नहि कश्चित्प्रियः स्त्रीणां अंजसा स्वाशिषात्मनां पतिं पुत्रं भ्रातरं वा घ्नंत्यर्थे घातयंति च ४३ प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् वधं नार्हति चेंद्रोऽपि तत्रेदमुपकल्पते ४४ इति संचिंत्य भगवान्मारीचः कुरुनंदन उवाच किंचित्कुपित आत्मानं च विगर्हयन् ४५ पुत्रस्ते भविता भद्रे इंद्रहा देवबांधवः सांवत्सरं व्रतमिदं यद्यंजो धारयिष्यसि ४६

नैवास्याः पुत्रः पिताया इंद्रघ्नो निवर्तयिष्यते पुत्रस्तमस्ये भविष्यति दीर्घकाले ते च व्रतस्य कथं विद्धेनुलोमतो इस्य वधोपि न भविष्यतीति ४४ ४५ हे इंद्रघ्नं पुत्रः यथावद्यदि धारयिष्यति तर्हि इंद्रहा भविष्यति वैगुण्ये तु देवबांधवो भविष्यति वैष्णवं तावद्व्रतमिदं गुणोपि स्मृति सर्वथा चेत्कल्पो भावात् ४६

Indira Gandhi National
Centre for the Arts

भा०ष०स० कार्याण्यावश्यकानि व्रतं यानि न घ्नंति नावश्यकानि तथा निषिद्धानि किंच त्वमनुज्ञातानि सर्वाण्यपि ब्रूहि ४७ तत्रैकत्रिंश
निषेधानाह नेत्यादिभिः पंचभिः नच क्रियाको शीत् यत्रिदेग लंकषान्नास्थ्यादिकं तत्र स्पृशेत् ४८ नाप्सु प्रविश्य स्नायात् सर्वविधृतां
५९ स्रजं पुनर्न धारयेत् ४९ भोजने पंच निषेधानाह नोच्छिष्टमिति चंडिकान्नं चंडकालेभ्यो निवेदितान्नं पीलिकादिदूषितं वा आमिषान्न वृषो

धारयिष्ये व्रतं ब्रह्मन् ब्रूहि कार्याणि यानि मे यानि चेह निषिद्धानि न व्रतं घ्नंति यान्युत ४७
न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत् न छिंद्यान्नखरोमाणि न स्पृशेद्यदमंगलं ४८ नाप्सु स्नायान्न
कुप्येत न संभाषेत दुर्जनैः न वसीताधौतवासः स्रजं च विधृतां क्वचित् ४९ नोच्छिष्टं चंडिकान्नं च सामिषं वृषला
हृतं भुंजीतोदक्यया दृष्टं पिबेदंजलिनात्वथः ५० नोच्छिष्टाऽस्पृष्टसलिला संध्यायां मुक्तमूर्धजा अनर्चिताऽ
संयतवाक् नाऽसंवीता बहिश्चरेत् ५१ नाऽधौतपादाऽप्रयता नार्द्रपादो उदक्शिराः शयीत नाऽपराङ् नान्यैर्न नग्ना
न च संध्ययोः ५२ धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता पूजयेत्प्रातराशात्प्राक् गोविप्रान् श्रियमच्युतं ५३
स्त्रियो वीरवतीश्चार्चेत् स्रग्गंधबलिमंडनैः पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तं ५४ श्रीरामः राम:
५९

न पिबेत् ५० गृहाद्बहिर्निर्गमे सप्त निषेधानाह नोच्छिष्टेति अनर्चिमंडनहीना असंवीता अप्रावृता ५१ शयने षण्णिषेधा
नाह नाधौतपादेति नापराक् पश्चिमशिराः ५३ कार्याण्याह धौतवासा इति प्रातराशात् प्रथमभोजनात् ५३ वीर
वतीर्जीवत्पुत्रकाः अर्च्य संपूज्य कोष्ठगतं कुक्षौ तरगतं ५४

पुंसवनं पुत्रोत्पत्तिकरं तु स्मांतवः ५५ ५६ हरिरिंद्रो व्रतस्य च्छिद्रं प्रसुषाप्तुमिच्छुः जिह्मकुटिलः साधुवेषः मृडा हालुब्ध
कोयथा मृगवंचनाय मृगोवेषो भवति तद्वत् ५९ केनमे व्रतं स्यादिति चिंतातुरः ६० अस्पृष्ट वारि अश्राव धौतांघ्रिश्च

सांवत्सरं पुंसवनं व्रतमेतदविप्लुतं धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ५५ बाढमित्यभिप्रेत्याथ दितीराजन्म
हामनाः काश्यपं गर्भमाधत्त व्रतं चांजोदधार सा ५६ मातृस्वसुरभिप्राय मिंद्र आज्ञाय मानद शुश्रूषणेनाश्रमस्थां
दितिं पर्यचरत्कविः ५७ नित्यं वनात्सुमनसः फलमूलसमित्कुशान् पत्रांकुरमृदोपश्च काले काल उपाहरत् ५८ एवं त
स्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप: प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ५९ नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ मही
पते चिंतां तीव्रां गतः शक्रः केनमे स्याच्छिवं त्विह ६० एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता अस्पृष्टवार्यधौतां
घ्रिः सुष्वाप विधिमोहिता ६१ लब्ध्वा तदंतरं शक्रो निद्रापहृतचेतसः दितेः प्रविष्ट उदरं योगेशो योगमायया ६२
चकर्त सप्तधा गर्भं वज्रेण कनकप्रभं रुदंतं सप्तधैकैकं मा रोदीरिति तान्पुनः ६३ ते तमूचुः पाट्यमानाः सर्वे प्रां
जलयो नृप नो जिघांससि किमिंद्र भ्रातरो मरुतस्तव ६४ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः अनन्यभावा
न्पार्षदानात्मनो मरुतां गणान् ६५ न ममार दितेर्गर्भः श्रीनिवासानुकंपया बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण
यथा भवान् ६६ सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यतां संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ६७ श्री

६१ निद्रयापहृतं चेतो यथाः ६२ मा रोदीरिति पुनः उपलालयन्नपि वज्रेण पुनः सप्तधा चकर्त विच्छेद ६३ ६४ कौशिकं इंद्र गणा
न्सप्तगणानेव मरुत इति श्रुते ६५ ६६ ६७

भा०षं०स० सजूषद् ६८ ७१ दितान्तिः कपरप्तु क्रोसतिइंद्रोपिन्तिः कपचमेवाह् अंचोति लब्धमंतरंयेन अर्थएवबुद्धिर्यस्य ७२ ७४
६०

सजूरिंद्रेणपंचाशद्देवास्तेमरुतोऽभवन् व्यपोह्यमातृदोषंते हरिणासोमपाः कृताः ६८ दितिरुत्थायददृशे कुमाराम
नलप्रभान् इंद्रेणसहितान्देवी पर्यतुष्यदनिंदिता ६९ अथेंद्रमाहताताहमादित्यानांभयावहं अपत्यमिच्छंत्यचरं
व्रतमेतत्सुदुष्करं ७० एकः संकल्पितः पुत्रः सप्तसप्ताभवन्कथं यदितेविदितंपुत्र सत्यंकथयमाम्रृषा ७१
अंबतेहंव्यवसितं उपधार्यागतोऽतिकं लब्धांतरोच्छिदंगर्भ मर्थबुद्धिर्नधर्मवित् ७२ कृत्तोमेसप्तधागर्भ
आसन्सप्तकुमारकाः तेपिचैकैकशोवृक्णाः सप्तधानाऽपिमम्रिरे ७३ ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितंमया
महापुरुषपूजायाः सिद्धिःकाप्यानुषंगिणी ७४ आराधनंभगवत ईहमानानिराशिषः येतुनेच्छंत्यपिपरंते स्वा
र्थकुशलाःस्मृताः ७५ आराध्यात्मप्रदंदेवं स्वात्मानंजगदीश्वरं कोवृणीतगुणस्पर्शं बुधःस्यान्नरकेपियत्
७६ तदिदंममदौर्जन्यं बालिशस्यमहीयसि क्षंतुमर्हसिमातस्त्वं दिष्ट्यागर्भोमृतोत्थितः ७७
इंद्रस्तयाभ्यनुज्ञातः शुद्धभावेनतुष्टया मरुद्भिःसहतांनत्वा जगामत्रिदिवंप्रभुः ७८ एतत्तेसर्वमाख्यातं
यन्मांत्वंपरिपृच्छसि मंगलंमरुतांजन्म किंभूयःकथयामिते ७९ रामः ६०

अपिपरंमोक्षमपि ७५ गुणस्पर्शं विषयभोगं बुधःकोवृणीतः यद्यस्मान्नरकेपिस्यात् ७६ महीयसिहेमहत्तमे मृतःस
न उत्थितः ७७ ७८ ७९

---

ऊनविंशेऽत्रप्रोक्तंकश्यपेनदितेर्व्रतं तदेवविस्तृतंलोकहितायऋषिणोदितं तस्यप्रकारमितिप्रोच मार्गशिरेमासेशुक्लपक्षेऽथा
दितःप्रतिपदि २ अनुमंत्र्यमहत्स्वशुक्लादयतासाः साशुक्लदंतीधौतदंता अलंकृतासतीपूजयेत् ३ आदौलावन्नमस्कारमं
त्रानाहत्रिभिः तेतुसंभ्रमालंपर्याप्तमेवसर्वंतत्किंचिद्भिरहतमस्तिअत केवलंतेतुभ्यंनमोस्तु पर्याप्तोहितवः निरपेक्षायपूर्णकामः

व्रतंपुंसवनंब्रह्मन् भवतायदुदीरितं तस्यवेदितुमिच्छामि येनविष्णुःप्रसीदति १
शुक्लेमार्गशिरेपक्षे योषिद्भर्तुरनुज्ञया आरभेतव्रतमिदं सार्वकामिकमादितः २ निशम्यमरुतांजन्म ब्राह्मणान
नुमंत्र्यच स्नात्वाशुक्लदतीशुक्ले वसीतालंकृतांबरे पूजयेत्प्रातराशात्प्राक् भगवंतंश्रियासह ३ अलंतेनिरपेक्षा
य पूर्णकाम नमोस्तुते महाविभूतिपतये नमः सकलसिद्धये ४ यथात्वंकृपयाभूत्या तेजसामहिम्नौजसा जुष्टई
शगुणैःसर्वैः ततोसिभगवान्प्रभुः ५ विष्णुपत्निमहामाये महापुरुषलक्षणे प्रीयेथामेमहाभागे लोकमातर्नमो
स्तुते ६ ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिपतयेसहमहाविभूतिभिर्बलिमुपहराणीतिअने
नाऽहरहर्मंत्रेणविष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूपदीपोपहारांश्च समाहिता
उपाहरेत् हविःशेषंतुजुहुयादनलेद्वादशाहुतीः ७

महाविभूतिपतये लक्ष्मीपतये सकलाःसिद्धयोऽणिमाद्यायस्मिन्तस्मै ४ ओ ईशायथायथावत्त्वंकृपादिभिर्जुष्टः अत्रैश्व
सत्यसंकल्पत्वादिभिः सर्वैर्गुणैः ततःत्वम् ५ महापुरुषस्यपरमेश्वरस्यैवलक्षणानिनियमाः तस्यासंबोधनमूजाः मं
त्रमाह ॐनमःइतिसप्तमुपहारविशिष्टं ७

Indira Gandhi National
Centre for the Arts

होमंमंत्रस्योदाहरणं दर्शयति ॐ निमितिचक्षुर्गमाप्तिविषयो १० इत्याद्यनिर्वर्त्तकः पुरुषव्यापारो भावनाम्यः क्रियालौकि
भा०ष०स० की ११ प्रत्ययोर्नामरूपयोः प्रकाशः आश्रयः तयोराधारः २२ २४ महापुरुषो चेतसा ईश्वरबुद्ध्या उपनमेत्तन्नजेत् २५ पतिश्च
६१ स्वयं प्रेमशाली सन् पत्न्याकर्माणि विन्नयात् तदनुकूलो भवेदित्यर्थः २६ अतः इत्यसोर्मध्ये एकतरेणकृतमुभयोरपि भवति

ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ भक्त्या संपूजयेन्नित्यं यदीच्छे
त्सर्वसंपदः ६ प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेतसा दशवारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत् ७ युवां तु विश्वस्य विभू जगतः
कारणं परं इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया १० तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः त्वं सर्वयज्ञ इज्येयं क्रि
येयं फलभुग्भवान् ११ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भवान् त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेंद्रियाशया नामरूपे
भगवती प्रत्ययस्त्वमपाश्रयः १२ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ तथा म उत्तमश्लोक संतु सत्या महाशिषः १३
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह तन्निःसार्योपहरणं दत्त्वाचमनमर्चयेत् १४ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण
चेतसा यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिं पतिं च परया भक्त्या महापुरुषचेतसा १५ प्रियैस्तैस्तैरुपनमेत् प्रेमशी
लः स्वयं पतिः बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च १६ कृतमेकतरेणापि दंपत्योरुभयोरपि पत्न्यां कुर्यादनर्हायां
पतिरेतत्समाहितः १७ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन विप्रान्स्त्रियो वीरवतीः स्रग्गंधबलिमंडनैः अर्चे राम:
दहरहर्भक्त्या देवं नियममास्थितः १८ उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा १९ ६१
एतेन पूजाविधिना मासान्द्वादश हायनं नीत्वाथोपरमेत्साध्वी कार्त्तिके चरमेऽहनि श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्व
वत् २०

१७ नविहन्यान्नविलंघयेत् १८ १९ द्वादशमासानित्युक्ते कदाचित्तत्र अधिमलमासे सति तेन सह द्वादशसंख्यायां सत्यां शुद्ध
मैकमासाः स्यात् हायनमित्युक्ते तत्राधिपतितस्यापि ग्रहणं स्यात् तदुभयं वारयितुमुभयमुक्तं उपवसेत् श्वोभूते प्रातरिति २१

भा०ष०स० पयःशृते तेन चरुपेकेन पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन २२ २३ सुप्रजास्त्वं सत्पुत्रत्वमित्यर्थः वाग्यतः आम्रशेषं २४
२५ अवीरा विधवा अभ्वरी सत्यपि या सुभर्तृका सुभगा भवती २६ यातु आमयावी रोगी सर्वेतिजा विशिष्ट्या रुजा विमुच्यते इंद्रियैः
६२

पयः शृते न जुहुयाच्चरुणा सह सर्पिषा पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः २२ आशिषः शिरसादाय
द्विजैः प्रीतैः समीरिताः प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञया २३ आचार्यमग्रतः कृत्वा वाग्यतः सह बंधुभिः द
द्यात्पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगं २४ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह स्त्री त्वेतदा
स्थाय लभेत सौभगं श्रियं प्रजां जीव — — पतिं यशो गृहं २५ कन्या च विंदेत समग्रलक्षणं पतिं त्ववीरा हतकि
ल्बिषां गतिं मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यं २६ विंदेद्विरूपा विरुजा विमुच्यते य आम
यावींद्रियकल्पदेहं एतत्पठन्नभ्युदये च कर्मण्यनंततृप्तिः पितृदेवतानां २७ तुष्टाः प्रयच्छंति समस्तका
मान् होमावसाने हुतभुक् श्रीहरिश्च राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते २८ ॥ ६ ॥
भाग श्रीराम
राम:
६२

महित्यल्पदेहं च विंदेदिति शेषः पठन् यो वर्त्तेत तस्य पितॄणां देवतानां च तृप्तिर्भवतीत्यर्थः २७ उपसंहरति राजन्निति महत्सुचेः स
मुत्पं जन्म सहद्वितं च षष्ठस्कंधनिगूढार्थपदभावार्थदीपिकायां सद्भिरासेव्यतामेषा यश्रीधरनिर्मिता २८ ॥ इति श्री श्रीधर

Indira Gandhi National
Centre for the Arts

Indira Gandhi National
Centre for the Arts